# 3 परिचयः – शतरुद्रीयं तत्त्वार्थ-दर्शनम्

Śatarudrīyam has a set of 11 anuvākās, describing the glory of Rudra, his omnipresence, omnipotence, and his grace to liberate the jīvātmās from the 3 types of duḥkhās. The contents are:

| | |
|---|---|
| (1) प्रथमानुवाके | भगवतः प्रसादः । |
| 2-9 अनुवाकेषु | सर्वेश्वरत्व – सर्वात्मकत्व – सर्वान्तर्यामित्व – आदिरूपेण भगवन्नमस्कारः । |
| (10) दशमे | भगवतः प्रार्थना । |
| (11) एकादशे | भगवदंशभूत रुद्रसङ्घ प्रार्थना । इति । |

### कोऽयं रुद्रः?

श्रीमद्भागवतपुराणे तृतीय स्कन्धे द्वादशाध्याये रुद्रस्य वर्णनं कृतं यथा—

यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः ।
ततस्त्वां अभिधास्यन्ति नाम्ना रुद्र इति प्रजाः ॥ 10 ॥

तत्र, 11 रुद्रस्थानानि → हृद्, इन्द्रियाणि, असुः, व्योम, वायुः, अग्निः, जलं, मही, सूर्यः, चन्द्रः, तपः ।

हृदिन्द्रियाण्यसुर्व्योम वायुरग्निर्जलं मही ।
सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रे कृतानि मे ॥ 11 ॥

11 रुद्राः → मन्युः, मनुः, महिनसः, महान्, शिवः, ऋतध्वजः, उग्ररेतः, भवः, कालः, वामदेवः, धृतव्रतः ।

मन्युर्मनुर्महिनसो महान् शिव ऋतध्वजः ।
उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥ 12 ॥

11 रुद्राण्यः → धीः, वृत्तिः, उसना, उमा, नियुत्, सर्पिः, इला, अम्बिका, इरावती, स्वधा, दीक्षा ।

धीर्वृत्तिरुसनोमा च नियुत्सर्पिरिलाम्बिका ।
इरावती स्वधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः ॥ 13 ॥

The concept of creation as explained in the Taittirīyopaniṣad—

सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च । तत् सृष्ट्वा । तदेवानुप्राविशत् । (तैत्तिरीयोपनिषद्-2.6) इति ।

Similarly, Rudra is also gloried through below Ṛgveda-mantra:

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु । यो रुद्रो विश्वा भुवना विवेश । तस्मै रुद्राय नमो अस्तु ॥

Śiva (Rudra) has created the World (=Jagat) and entered into that using his "Māya" śakti. We are calling him "Jīva", who is inside this Jagat. This "Māya" has 3-aspects of it – Sattva, Rajas and Tamas.

- Sattva-guṇa assists him to remember his true nature. This is called Prakāśa-Śakti.
- Rajo-guṇa assists him, to scatter and spread over the world. This is called Vikṣepa-Śakti.
- Tamo-guṇa assists him, to hide his true nature, and remain in the World. This is called Āvaraṇa-Śakti.

His Rajo and Tamo guṇās are causing suffering to the world. Sattva-guṇa is helping to show the reality. With these 3-guṇās, He pervaded everything in the world. He is omnipresent, being both in the good and bad.

Thus, let this study of Śatarudrīyam be commenced with this maṅgala-śloka:

अर्थमात्र-भासिताय शब्दब्रह्मणे च
सोमामृत-शिखराय सूर्यात्मकाय च ।
मूल-प्रकृति-रूपाय पुरुषोत्तमाय
चराचरेश्वराय नमो नमः शिवाय ॥

- [शब्दः & अर्थः] Who is conceived (भासितः) as (अर्थ-मात्र) being only the purpose of words, and who is the Śabda-Brahman;
- [सूर्यः & सोमः] Who has the Soma-rasa (सोम+अमृत) flowing in his tuft (शिखरः) as gangā, and who is the soul (आत्मकः) of Sūrya (सूर्यः);
- [प्रकृतिः & पुरुषः] Who is the form of Mūla-Prakṛti, and who is the best (उत्तमः) of all Puruṣās.
- [चरः & अचरः] Who is the lord (ईश्वरः) of both moveable (चरः) & immovable (अचरः), I surrender my'self' to that Śiva.

## 3.1 प्रथमानुवाकः

1.1 नम॑स्ते रुद्र म॒न्यव॑ उ॒तो त॒ इष॑वे॒ नमः॑ ।
नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्यां॑मु॒त ते॒ नमः॑ ॥

नमः ते रुद्र मन्यवे उतो ते इषवे नमः ।
नमः ते अस्तु धन्वने बाहुभ्याम् उत ते नमः ॥ 1.1॥

| | |
|---|---|
| नमः | नमति (अहङ्कारादि द्वैतरूपाणि प्रकर्षेण हन्ति) इति नमः । णम प्रह्वत्वे ।<br>ॐ स्वाहा स्वधा वषट् नमः इति पञ्च ब्रह्मणो नामानि ।<br>वाङ्-मनः-कायैः आराध्य आधीन आत्मत्व सम्पादनं, ब्रह्मत्व अपरनामधेयं नमः शब्दार्थः । |
| ते | (युष्मद्, ष.वि., ए.व.) = तव । |
| मन्यवे | (मन्युः, तस्मै) मन्यते अनेन इति मन्युः । मन ज्ञाने । |
| उत+उ | निपात समाहारम् । (अपि च) |
| इषवे | (इषुः, तस्मै) इष्यति (रुद्राय) गच्छति इति इषुः । इष = गतौ । |
| अस्तु | (अस भुवि + विध्याशिषौ लोट् , प्र.पु., ए.व.) = भवतु । |
| धन्वने | (धनुः = धन्वन्, तस्मै) धन्वति (रुद्रं) प्रार्थयते इति धनुः । धन प्रार्थनायाम् । धवि गतौ । |
| बाहुभ्याम् | (बाहुः, ताभ्याम्) बाहते अनेन (पुरुषः आध्यात्मिक सिद्ध्यर्थं, प्रयत्नं करोति) इति बाहुः । बाहृ प्रयत्ने । |

✍ रुद्रः = ब्रह्मा । मन्युः = (अनीशा) माया-शक्तिः । इषुः = आत्मा = जीवः । धनुः = प्रणवः । बाहू = विक्षेप-आवरण-शक्त्योः उपादानौ ।

विक्षेपावरणा शक्तिर्दुरन्तासुखरूपिणी ।
जडरूपा महामाया रजःसत्त्वतमोगुणा ॥ शिवसंहिता 1.79॥
सा मायावरणाशक्त्यावृता विज्ञानरूपिणी ।
दर्शयेज्जगदाकारं तं विक्षेपस्वभावतः ॥ शिवसंहिता 1.80॥

✍ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । (मुण्डकोपनिषत् 2.2.4 ॥)

✍ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥ (मुण्डकोपनिषत् 3.1.2॥)

✍ आधारादि स्थान गत दशविध ध्वनिरेव टङ्कारः । सुषुम्नादि त्रिरावृता रज्जुः । काल एव धानुष्कः । (विष्णुसूरि रुद्रभाष्यम्)

✍ बाहू चात्र विक्षेप+आवरणशक्ति लिङ्ग+उपादानतया जीवभावस्य तद् अधीनत्वात् । (विष्णुसूरि रुद्रभाष्यम्)

- विक्षेप शक्तिः = रजोगुणात्मिका ।
- आवरण शक्तिः = तमोगुणात्मिका ।

✍ धर्माधर्मौ वा तदनुसारेण सुखदुःखे नियते प्रपद्यते सर्वो लोको । दक्षिणोत्तरमार्गौ वा धर्म-मोक्षादि प्रापकत्त्वात् तयोः यथा अश्नुते ।

| | |
|---|---|
| रुद्र !<br>नमः ते मन्यवे<br>उत+उ ते इषवे नमः ।<br>नमः ते अस्तु धन्वने<br>उत ते बाहुभ्याम् नमः ॥ | Namaskārās to Rudra,<br>To his Manyu (मन्यवे) form,<br>And also (उत+उ), To his arrows (इषवे),<br>To his Bow (धन्वने) and his both hands (बाहुभ्याम्). |

प्रणवो धनुः । शरो हि आत्मा । ब्रह्म तत् लक्ष्यम् उच्यते ।

- Oṁkāra is the Bow.
- Individual soul (Jīva) is the Arrow.
- Brahman (=Rudra) is the target.

The Hands are holding the bow/arrow. One hand is holding the bow (Āvaraṇa Śakti), Another hand is pulling the arrow (Vikṣepa Śakti). His Mind is leading the arrow towards the goal (Prakāśa Śakti). This is his Manyu-Form.

1.2 या त॒ इषुः॑ शि॒वत॑मा शि॒वं ब॒भूव॑ ते॒ धनुः॑ ।
शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय ॥

या ते इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नः रुद्र मृडय ॥ 1.2॥

| | |
|---|---|
| या | (स्त्री, यद् , प्र.वि., ए.व.) |
| ते / तव | (युष्मद्, ष.वि., ए.व.) |
| इषुः | इष्यति (रुद्राय) गच्छति इति इषुः । इष = गतौ । |
| शिवतमा | (शिवा, शिवतरा, शिवतमा)<br>शमयति (अनात्मनः दोषान्) इति शिवा । शमु उपशमे ।<br>शाम्यति (परमानन्द रूपत्वात् निर्विकारो भवति) इति शिवः । शमु उपशमे । |
| बभूव | = भवति । भू सत्तायम्, छन्दसि लुङ् लङ् लिटः । (अष्टाध्यायी 3.4.6) |
| धनुः | धन्वति (रुद्रं) प्रार्थयते इति धनुः । धन प्रार्थनायाम् । धवि गतौ । |
| शरव्या | शृणाति (अनात्मरोगम्) इति शरः । शॄ हिंसायाम् ।<br>तान् व्ययति इति शरव्या । व्येञ् संवरणे । |
| तया | (स्त्री, तद्, तृ.वि., ए.व.) |
| नः | (अस्मद्, द्वि.वि., ब.व.) |
| मृडय | (मृड् सुखने + णिच् प्रेरणार्थे, विध्याशिषौ लोट् , म.पु. ए,व) = सुखय । |

- ✍ शराः = जीवाः
- ✍ यदा शरः (जीवः) लक्ष्यं (ब्रह्माणं) प्राप्नोति, तदा शरः शिवतमः भवति, अर्थात् जीवः शिवः भवति , तयोः अत्यन्तम् अभेदः ।
- ✍ धनुः = प्रणवः = शिव वाचकः (तस्य वाचकः प्रणवः, योगसूत्रम् 1.27) । तद्-जपः तद्-अर्थभावनम् , योगसूत्रम् 1.28) । ततः प्रत्यक्-चेतन-अधिगमो, ऽपि अन्तराय-अभावश्च , योगसूत्रम् 1.29) ।
- ✍ शरव्याः = जीवाः तिष्ठन्ति यस्यां सा शरव्या = माया / जगत् । जीवब्रह्मैक्ये सति, सर्वावरण क्षयात् दृश्यभावना नश्यति । तदा सर्वावरण-मलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयम् अल्पम् (योगसूत्रम् 4.31) । तदा द्रष्टुः स्वरूपे अवस्थानम् (योगसूत्रम् 1.3) ।
- ✍ मृडय → ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य च अकामहतस्य । (तैत्तिरीयोपनिषत् 2.8)

| | |
|---|---|
| ते या इषुः शिवतमा | O Rudra!<br>Your arrows are very auspicious. |

| | |
|---|---|
| ते धनुः शिवं बभूव ।<br>तव या शिवा शरव्या<br>तया नः रुद्र मृडय ॥ | Your Bow is auspicious.<br>Your Quiver is auspicious.<br>With that, Bless us with Happiness. |

- Arrows = Jīva's = their real nature is happiness.
- Bow = Oṁkāra = Its the Happiness.
- Quiver = Collection of Arrows / Jīvās = Māya Jagat.

When the covering of Rajo/Tamo guṇās are destroyed through that "PRAṆAVA" bow, The reflection of "Self" is revealed through Sattva-guṇa. So, that is the state of pure bliss. ĀTMAN and BRAHMAN becomes ONE.

1.3 या तें रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी ।
तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि ॥

या ते रुद्र शिवा तनूः अघोरा अपापकाशिनी ।
तया नः तनुवा शन्तमया गिरिशन्त अभिचाकशीहि ॥ 1.3॥

| | |
|---|---|
| या | (स्त्री, यद् , प्र.वि., ए.व.) |
| ते | (युष्मद्, ष.वि., ए.व.) |
| तनूः | तनोति इति तनूः । तनु विस्तारे । |
| अघोरा | घोरयति इति घोरा । न घोरा अघोरा । घुर् भीमार्थशब्दयोः । |
| अपापकाशिनी | पापम् अत्र नास्ति इति अपापम् । तेन काशते इति अपापकाशिनी । काशृ दीप्तौ । |
| तया | (स्त्री, तद्, तृ.वि., ए.व.) |
| नः | (अस्मद्, द्वि.वि., ब.व.) = अस्मान् |
| तनुवा | (तनूः, तया) |
| शन्तमया | (शन्तमा, तया) अतिशयेन शं (मुक्तिसुखं) तनोति इति शन्तमा । तनु विस्तारे । |
| गिरिशन्त | गिरति (आध्यात्मिकात् वेदप्रमाणानि वैदिकबोधान्) इति गीः । गॄ निगरणे ।<br>तस्मिन् शं तनोति इति गिरिशन्तः । तनु विस्तारे । |

| | |
|---|---|
| अभिचाकशीहि | (अभि+ काशृ दीप्तौ + यङ्लुक् [पुनः पुनः अतिशयेन वा], विध्याशिषौ लोट्, म.पु., ए.व.) = अभिलक्ष्य प्रकाशं कुरु । |

- ✍ (तैत्तिरीय संहिता 5.7.3.3) रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या शिवान्या ।
  - यच्छंतरुद्रीयं जुहोति यैवास्यं घोरा तनूस्तां तेनं शमयति ।
  - यद्वसोर्धारां जुहोति यैवास्यं शिवा तनूस्तां तेनं प्रीणाति ।
- ✍ अनुग्राहिका शिवा ।
  - तदा द्रष्टुः स्वरूपेऽवस्थानम् । योगसूत्रम् 1.3 ।
  - निरोध चित्तावस्थायाम् ।
  - अघोरा । अपापकाशिनी ।
    - क्लेश-कर्म-विपाक-आशयैः अपरामृष्टः पुरुष-विशेष ईश्वरः । योगसूत्रम् 1.24।
- ✍ हिंसिका घोरा
  - वृत्ति-सारूप्यम् इतरत्र । योगसूत्रम् 1.4 ।
  - व्युत्थान चित्तावस्थायाम् ।
- ✍ सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।

  ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ (भगवद्गीता 14.9)
  - शिवा तनूः → सत्त्वोकर्षनिमित्ता विद्यावृत्तिः ।
  - अघोरा → रजो गुण अभावः ।
  - अपापकाशिनी → तमो गुण अभावः ।
- ✍ गिरिशन्त
  - तत्र निरतिशयं सर्वज्ञबीजम् । योगसूत्रम् 1.25 ।
- ✍ अभिचाकशीहि
  - पूर्वेषाम् अपि गुरुः कालेन-अनवच्छेदात् । योगसूत्रम् 1.26 ।
  - कस्मिन् नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥ मुण्डकोपनिषत् 1.1.3 ।

| | |
|---|---|
| रुद्र! | O Rudra!<br>That form of Śiva, |

| | |
|---|---|
| ते या शिवा तनूः<br>अघोरा अपापकाशिनी ।<br>गिरिशन्त!<br>तया शन्तमया तनुवा<br>नः अभिचाकशीहि ॥ | Which is not Frightful,<br>Which shows the Sinless state.<br>O Giriśanta! (Source of Bliss in Vedas)<br>Through that form of Supreme-Bliss,<br>Reveal us the Truth. |

Rudra has two Forms:

1) Ghora = Frightful and
2) Śiva = Blissful.

Ghora is the Form, causing suffering through Rajo-guṇa. Śiva is the Form, causing bliss through Sattva-guṇa and shows the Supreme-truth. Aghora is the Śiva form, which reveals the Sinless state, beyond Triguṇās. He is Giriśanta - Bestows the Bliss, through revealing the Ultimate Truth in Vedas.

1.4 यामिषुं गिरिशंत॒ हस्ते॒ बिभ॒र्ष्यस्तंवे ।
शि॒वां गिंरित्र॒ तां कुंरु॒ मा हिग्ँ॒सी॒ः पुरुंष॒ं जगंत् ॥
1.5 शि॒वेन॒ वचंसा त्वा॒ गिरि॒शाच्छांवदामसि ।
यथां न॒ः सर्व॒मिज्जगंदय॒क्ष्मग्ँ सु॒मना॒ असंत् ॥

याम् इषुं गिरिशन्त हस्ते बिभर्षि अस्तवे ।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥ 1.4॥

| | |
|---|---|
| याम् | (स्त्री, यद्, द्वि.वि., ए.व.) |
| इषुं | इष्यति (रुद्राय) गच्छति इति इषुः । इष = गतौ । |
| गिरिशन्त | गिरति (आध्यात्मिकात् वेदप्रमाणानि वैदिकबोधान्) इति गीः । गॄ निगरणे ।<br>तस्मिन् शं तनोति इति गिरिशन्तः । तनु विस्तारे । |
| हस्ते | हन्यन्ते (अनात्मनः) अनेन इति हस्तः । हन हिंसागत्योः । तस्मिन् हस्ते । |
| बिभर्षि | (डुभृञ् धारणपोषणयोः + वर्तमाने लट्, म.पु., ए.व.) = धारयसि |

| | |
|---|---|
| अस्तवे | क्षेप्तुम् = असु क्षेपणे + तवेन् । (छन्द्सि) तुमर्थे से सेनसे .... तवेनः । (अष्टाध्यायी 3.4.9) |
| शिवां | (स्त्री, शिवा, द्वि.वि., ए.व.) |
| गिरित्र | गिरति (आध्यात्मिकात् वेदप्रमाणानि वैदिकबोधान्) इति गीः । गॄ निगरणे ।<br>तस्मिन् जीवान् त्रायते इति गिरित्रः । त्रैङ् पालने । |
| तां | (स्त्री, तद्, द्वि.वि., ए.व) |
| कुरु | (डुकृञ् करणे + विध्याशिषौ लोट्, म.पु., ए.व.) |
| मा | निषेधार्थे |
| हिंसीः | (हिंस्= हिंसायाम्) |
| पुरुषं | पुरति अग्रे सरति इति पुरः । पुर अग्रगमने । तस्मिन् (आध्यात्मिके) शेते इति पुरुषः । शीङ् स्वप्ने ।<br>तं पुरुषम् । |
| जगत् | जायन्ते (आध्यात्मिक भावाः) अस्मिन् इति जम् । जनी प्रादुर्भावे ।<br>तेन सह (आध्यात्मिक साधने) गच्छति इति जगत् । गमॢ गतौ ।<br>तं जगत् । |

- अस्तवे हस्ते बिभर्षि ।
    - इषुं क्षेपणार्थं, हस्ते धारयसि । इषुः = जीवः, त्रिगुणोपेतः । लक्ष्यम् ब्रह्मणं प्रति प्रेषयितुं इषुं तव हस्ते बिभर्षि ।
- ताम् इषुं शिवां कुरु ।
    - रजोगुणं च तमो गुणं च शमयित्वा, सत्त्व प्रसादेन पुरुषाय सुखं ददातु । चित विक्षेपादि अन्तरायन् शमयतु ।
    - विवेकख्यातिः अविप्लवा हानोपायः । (योगसूत्रम् 2.26) ।
- गिरित्र ।
    - अभ्यासकाले योगीनां त्रायति = पालयति, इति गिरित्रः ।
    - श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा-पूर्वक इतरेषाम् । (योगसूत्रम् 1.20) ।
    - गिरित्रः पालयति वा पोषयति श्रद्धादीन् उपायान् ।
- मा हिंसीः पुरुषं जगत् ।

- पुरुषः = द्रष्टा, जगत् = दृश्यम् ।
- द्रष्टृ-दृश्ययोः संयोगो हेय-हेतुः । (योगसुत्रम् 2.17) ।
- स्व-स्वामि-शक्त्योः स्वरूप-उपलब्धि-हेतुः संयोगः । (योगसूत्रम् 2.23) ।
- तस्य हेतुः अविद्या । (योगसूत्रम् 2.24) । तद्-अभावात् संयोग-अभावो हानं, तद्-दृशेः कैवल्यम् । (योगसूत्रम् 2.25)

| | |
|---|---|
| गिरिशन्त !<br>अस्तवे याम् इषुं हस्ते बिभर्षि ।<br>गिरित्र !<br>तां शिवां कुरु<br>मा हिंसीः पुरुषं जगत् ॥ | O Giriśanta (Source of Bliss in Vedas)!<br>Those arrows, held in your hand, for throwing,<br>O Giritra (Protector of Vedas)!<br>Make that arrow blissful.<br>Do not hurt, both the Puruṣa and the Jagat. |

The arrow is the Jīva. It has to be targeted towards the Brahman. So, the arrow (Jīva) should be made blissful, by removing the Rajo and Tamo guṇās. So, the Puruṣa and the entire world should also not be hurt by these Rajo/Tamo guṇās.

शिवेन वचसा त्वा गिरिश अच्छ वदामसि ।

यथा नः सर्वम् इत् जगत् अयक्ष्मं सुमनाः असत् ॥ 1.5॥

| | |
|---|---|
| शिवेन | (पुं., शिव, तृ.वि., ए.व.) |
| वचसा | (पुं, वचस्, तृ.वि., ए.व.) |
| त्वा | त्वाम् (त्वद्, द्वि.वि., ए.व.) |
| गिरिश | गिरति आध्यात्मिकात् वेदप्रमाणानि वेदबोधान् इति गीः । गॄ निगरणे ।<br>तस्मिन् शेते इति गिरिशः । शीङ् स्वप्ने । |
| अच्छ | = आप्तुम् । (अव्ययम्) अभि शब्दस्य अर्थे । |
| वदामसि | वदामः । (छन्दसि) |
| यथा | (अव्ययम्) |
| नः | (अस्मद्, च.वि., ब.व.) = अस्मभ्यम् |

| | |
|---|---|
| सर्वम् | (न., सर्व, प्र.वि., ए.व.) |
| इत् | एति इति इति । इण् गतौ । (अवधारणार्थे) |
| जगत् | जायन्ते (आध्यात्मिक भावाः) अस्मिन् इति जम् । जनी प्रादुर्भावे । तेन सह (आध्यात्मिक साधने) गच्छति इति जगत् । गमॢ गतौ । |
| अयक्ष्मं | यक्ष्मा = रोगविशेषः । अयक्ष्मम् = आरोगता । उपलक्षितेन, सर्वेषां चित्तविक्षेपाणाम् अभावः । |
| सुमनाः | सुष्ठु मन्यते सुमनाः । मन ज्ञाने । |
| असत् | =स्यात् । (छन्दसि) अस भुवि + लेट् लकारः (लेटोऽडाटौ अष्टाध्यायी 3.4.95) |

- गिरिश
- शिवेन वचसा ।
    - शुभ वचनैः ।
    - अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
      स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥ (भगवद्गीता 17.15)
- त्वा अच्छ वदामसि ।
    - त्वां प्राप्तुं स्तुमः ।
    - ईश्वरप्रणिधानाद्वा (यो.सू. 1.23) । तस्य वाचकः प्रणवः (यो.सू. 1.27)। तज्जपः तदर्थ भावनम् (यो.सू. 1.28) ।
- ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
  यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥ (भगवद्गीता 8.13)
    - आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
      मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ (भगवद्गीता 8.16) ।
    - ओमिति ब्रह्म । ओमितीदँसर्वम् । ओमित्येतदनुकृतिर्हस्म वा अप्यो श्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओँशोमिति शस्त्राणि शँसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति ब्रह्मैवोपाप्नोति ॥ 1 ॥ (तैत्तिरीयोपनिषत् शिक्षावल्ली अष्टमोनुवाकः ।)
- यथा = कथम् इत्युक्ते । नः = अस्माकम् ।
- इदं सर्वम् जगत् ।

✍ अयक्ष्मम् = रोगरहितम् = उपलक्षितेन सर्वेषाम् विक्षेपाणाम् अभावः ।

- व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-अनवस्थितत्वानि चित्तविक्षेपाः । (योगसूत्रम् 1.30)

✍ सुमनाः असत् = चित्तं सत्त्वं शुद्धं भवेदिति ।

- सत्त्वशुद्धि-सौमनस्य-एकाग्र्य-इन्द्रियजय-आत्मदर्शन-योग्यत्वानि च । (योगसूत्रम् 2.41)

| | |
|---|---|
| गिरिश !<br>त्वाम् अच्छ<br>शिवेन वचसा वदामसि ।<br>यथा नः<br>सर्वम् इत् जगत्<br>अयक्ष्मम्<br>सुमनाः असत् ॥ | O Giriśa (Dweller of Vedas)<br>To attain you,<br>We speak with auspicious words.<br>Because, for us,<br>So that, the entire world becomes<br>Free from Disturbances like diseases<br>Pure-minded, illuminating the Truth. |

Praṇava is the Brahman. To attain the Brahman, Īśvara Praṇidhāna is the technique. Īśvara Praṇidhāna helps in both, removing the obstacles in the Sādhana, and also turning the mind inwards. Doing the Japa of Praṇava and contemplating the Īśvara Bhāvana, is the "Īśvara Praṇidhāna".

1.6 अध्यंवोचदधिवु॒क्ता प्रंथु॒मो दैव्यों भि॒षक् ।
अहींग्ँश्च सर्वाञ्जम्भयु॒न्त्सर्वांश्च यातुधा॒न्यंः ॥

अधि अवोचत् अधिवक्ता प्रथमः दैव्यः भिषक् ।
अहीन् च सर्वान् जम्भयन् सर्वाः च यातुधान्यः ॥ 1.6॥

| | |
|---|---|
| अधि अवोचत् | अधि ब्रवीतु । अधि + वच परिभाषणे, छन्दसि लोडर्थे लुङ् (अष्टाध्यायी 3.4.6), प्र.पु., ए.व. । |
| अधिवक्ता | अधि आधिक्येन तिष्ठति इति अधिष्ठानः । अधिष्ठानः भूत्वा वक्ता इति अधिवक्ता । वच परिभाषणे । |

| | |
|---|---|
| प्रथमः | प्रथते प्रथमः । प्रथ प्रख्याने । |
| दैव्यः | दीव्यति इति देवः । दिव द्युतौ । तत्र भवं दैवम् । तस्य योग्यः अत्र दैव्यः । |
| भिषक् | वैद्यः । (पुं, भिषज्, प्र.वि., ए.व.) । बिभेति रोगो यस्मादिति । भी भये । |
| अहीन् | हन्ति इति अहिः । हन हिंसागत्योः । |
| च | (अव्ययम्) |
| सर्वान् | (पुं., सर्व, द्वि.वि., ब.व.) |
| जम्भयन् | जभि नाशने + शतृ+लट् (पुं., प्र.वि., ए.व) |
| सर्वाः | (स्त्री., सर्व, द्वि.वि., ब.व.) |
| यातुधान्यः | यातयति = व्यथयति इति यातु । यत निकारोपकारयोः ।<br>तं दधति इति यातुधान्यः । डु धाञ् धारणपोषणयोः । |

- ✍ भिषक् = व्याध्यादि चित्तविक्षेपान् अपाकरोति ।
    - व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-
      अनवस्थितत्वानि चित्तविक्षेपाः । (योगसूत्रम् 1.30)
- ✍ दैव्यः = शुद्ध सत्त्वः । प्रकाशयति स्वरूपम् ।
    - तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
      भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ (भगवद्गीता 16.3)
- ✍ यातुधान्यः = यक्षराक्षसादयः । रजो प्राबल्याः ।
    - दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।
      अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥ (भगवद्गीता 16.4)
- ✍ अहयः = आगत्य हिंसन्ति जन्तूनिति अहयः । व्याघ्र-सर्प-वृश्चिकादयः । तमो प्राबल्याः तिर्यग्योनयः ।
    - अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
      मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥ (भगवद्गीता 18.25)
- ✍ यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
  प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ भगवद्गीता 17.4)
- ✍ ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
  जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ (भगवद्गीता 14.18)

✍ दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥ (भगवद्गीता 16.5)

✍ अधिवक्ता =

- स्वतः प्रमाणत्वात् सः अधिवक्ता । किमित्युक्ते—
    - तत्र निरतिशयं सर्वज्ञबीजम् । (योगसूत्रम् 1.25)

✍ प्रथमो ।

- पूर्वेषाम् अपि गुरुः कालेन-अनवच्छेदात् । (योगसूत्रम् 1.26) ।
- न मे विदुः सुरगणाः प्रभवं न महर्षयः।
  अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ (भगवद्गीता 10.2)

✍ अधि अवोचत् ।

- इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
  विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ (भगवद्गीता 4.1)
- प्रत्यक् चेतनाधिगन्तुम् योगम् सः अध्यवोचत् ।

| | |
|---|---|
| सर्वान् अहीन् च<br>सर्वाः यातुधान्यः च<br>जम्भयन्<br>भिषक् दैव्यः प्रथमः<br>अधिवक्ता<br>अधि अवोचत् | To all those Tiryak-beings like Snakes, Tigers,<br>To all those demons like Yakṣa, Rākṣasa, Piśācās,<br>While destroying them,<br>The Physician for all Distractions of the Citta,<br>The illuminator of the Truth<br>The Foremost of all,<br>Who is the Pramāṇa by himself,<br>Let him teach the Yoga to realize the Truth. |

By destroying the Tamasic and Rajasic forces in our Citta, He is removing all the distractions of Citta. Thus, He is the Divine Physician. Thus, Citta becomes pure with Sattva guṇa. That Pure Citta illuminates the True-Self. He is the seed of Omniscience, So he is the Pramāna for himself. So, he is the First one to teach this Yoga to our ancients also.

1.7 अ॒सौ यस्ता॒म्रो अ॑रु॒ण उ॒त ब॒भ्रुः सु॑म॒ङ्गलः॑ ।

ये चे॒माग्ँ॒ रु॒द्रा अ॒भितो॑ दि॒क्षु श्रि॒ताः स॑हस्र॒शोऽवै॑षा॒ग्ँ॒ हेड॑ ईमहे ॥

1.8 अ॒सौ यो॑ऽव॒सर्प॑ति॒ नील॑ग्रीवो॒ विलो॑हितः ।

उ॒तैनं॑ गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्यः॑ ।

उ॒तैनं॒ विश्वा॑ भू॒तानि॒ स दृ॒ष्टो मृ॑डयाति नः ॥

असौ यः ताम्रः अरुणः उत बभ्रुः सुमङ्गलः ।

ये च इमां रुद्राः अभितः दिक्षु श्रिताः सहस्रशः अव एषां हेडः ईमहे ॥ 1.7॥

| | |
|---|---|
| असौ | (पु., अदस्, प्र.वि., ए.व.) असौ आदित्यः । |
| यः | (पु., यद्, प्र.वि., ए.व.) |
| ताम्रः | ताम्यति (साधकम् अर्थयते) इति ताम्रः । तमु काङ्क्षायाम् । |
| अरुणः | इयर्ति गच्छति इति अरुणः । ऋ गतौ । |
| उत | (अव्ययम्) = अपि च । |
| बभ्रुः | बिभर्ति साधकम् इति बभ्रुः । डु भृञ् धारणपोषणयोः । |
| सुमंगलः | सुष्ठु मङ्गति धन्यम् इति सुमङ्गलम् । मगि गतौ । |
| ये | (पु., यद्, प्र.वि., ब.व.) |
| च | (अव्ययम्) |
| इमां | (स्त्री, इदम्, द्वि.वि., ए.व.) इमां पृथ्वीम् । |
| अभितः | = परितः । अभि सर्वतः गच्छति इति अभितः । गमॢ गतौ । |
| दिक्षु | दिशति अवकाशम् इति दिक् । दिश अतिसर्जने । |
| श्रिताः | श्रीयते स्म श्रितः । श्रिञ् सेवायाम् । |
| सहस्रशः | दश दश गुणं शतम् । शत दश गुणं सहस्रम् । सहस्रं + शस् |
| एषां | (पुं., इदम्, ष.वि., ब.व.) |
| हेडः | हेड्यते अनेन इति हेडः । हेडृ अनादरे । |
| अव | (उपसर्ग विशेषः) अपनयने |
| अव + ईमहे | ईमहे = याचामहे । ईङ् गतौ । (छन्दसि लोडर्थे लट् विकरणस्य लुक् च) । |

- ✍ असौ यः = यः प्रत्यक्षं दृश्यमानः आदित्यः । ऊर्ध्वलोकवर्ती ।
    - वेदा॒हमे॒तं पुरु॑षं म॒हान्तम्॑ । आ॒दि॒त्यव॑र्णं॒ तम॑सस्तु॒ पा॒रे । (पुरुष सूक्तम्)
- ✍ ताम्रः
    - उदय समये अति-रक्तः आदित्यः तमः सम्पर्कात् ।
    - तमु काङ्क्षायाम् → अतः इच्छाशक्ति युतः । यद्वा आवरण शक्तिः ।
- ✍ अरुणः
    - उदयात् ऊर्ध्वम् ईषत्-रक्तः ।
    - ऋ गतौ → अतः क्रियाशक्ति युतः । यद्वा विक्षेप शक्तिः ।
- ✍ बभ्रुः
    - तदनन्तरं पिङ्गलवर्णः वा गौरवर्णः ।
    - डु भृञ् धारणपोषणयोः → धारणा शक्तिः वा प्रकाश शक्तिः सा सत्त्विकी ।
- ✍ सुमङ्गलः → शुद्ध सत्त्वे प्रकाशनात् शुभङ्करः इति । शं = सुखं करोति इति शङ्करो वा ।
- ✍ ताम्रः (इच्छाशक्तिः)→ अरुणः (क्रियाशक्तिः) → बभ्रुः (ज्ञानशक्तिः) → सुमङ्गलः (शिवः) ।
- ✍ यथा, प्रातिभात् वा सर्वम् (योगसूत्रम् 3.33)
    - प्रातिभं नाम तारकम् । तद्विवेकजस्य ज्ञानस्य पूर्वरूपम् । यथोदये प्रभा भास्करस्य । तेन वा सर्वमेव जानाति योगी, प्रातिभस्य ज्ञानस्योत्पत्ताविति ॥ (व्यासभाष्यम् 3.33।)
- ✍ इमाम् अभितः दिक्षु = इमाम् पृथ्वीम् = चित्त भूमिम् । आवृत्य दश दिक्षु ।
- ✍ श्रिताः सहस्रशः ये रुद्राः = जीवभावेन सहस्रं सहस्रं भूत्वा तिष्ठन्ति ये रुद्राः ।
    - स॒हस्र॑शीर्षा॒ पुरु॑षः । स॒ह॒स्रा॒क्षः स॒हस्र॑पात् ।
      स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा । अत्य॑तिष्ठद्दशाङ्गु॒लम् ॥ (पुरुष सूक्तम् - 1) ।
- ✍ एषां हेडः अव+ईमहे = एषां रुद्राणाम् अनादरं दूरीकर्तुं याचामहे ।
    - हेडः = लौकिक प्रवृत्तिः । एकाग्रीभूतस्य चित्तस्य आवरणे वा क्षेपणे प्रवृत्तिः ।
    - अर्थात् – ईश्वरस्य प्रसादः सर्वदा भवेदिति याचामहे ।
    - स्थानि-उपनिमन्त्रणे सङ्ग-स्मय-अकरणं, पुनः अनिष्ट-प्रसङ्गात् । (योगसूत्रम् 3.51)
    - लौकिक विषयेषु उदासीनः करणीयः । यथा चोक्तम् → प्रसंख्याने अपि अकुसीदस्य सर्वथा-विवेकख्यातेः धर्म-मेघ-समाधिः । (योगसूत्रम् 4.29)

| | |
|---|---|
| असौ यः<br>ताम्रः अरुणः<br>उत बभ्रुः सुमङ्गलः च ।<br>इमां अभितः दिक्षु<br>श्रिताः<br>सहस्रशः ये रुद्राः<br>एषां हेडः अव ईमहे ॥ | This is the Sun, who is seen as,<br>Copper-reddish and reddish just before the dawn,<br>And Bright-whitish after rises.<br>He is the bestower of auspiciousness (Śiva).<br>Surrounding this earth in all directions.<br>These Rudrās are present in thousands.<br>We pray them to remove our ignorance forever. |

The rising Sun in the dawn, has first deep-red color due to being covered with Darkness. Slowly it turns into light red, and then into Bright-whitish color. i.e., When Tamo guṇa and Rajo guṇa disappear, Pure Sattva-guṇa reflects the Brahman. This is the dawn of Sun. This is the dawn of Viveka-khyāti, which bestows Mokṣa.

- Tamo-guṇa is his Icchā-Śakti or Āvaraṇa Śakti.
- Rajo-guṇa is his Kriyā Śakti or Vikṣepa Śakti.
- Sattva-guṇa is his Jñāna Śakti or Prakāśa Śakti.

These Rudrās are capable to push the souls into Saṁsāra through their Icchā/ Kriyā/ Jñāna Śaktīs, and also pull them out of Saṁsāra by bestowing the Mokṣa. These are the two states of Citta - Vyutthāna and Niruddha Citta. We pray them, to keep us wakeful in the dawn of Viveka-khyāti, and not throw us into Saṁsāra. i.e., To remain in Niruddha Citta forever.

असौ यः अवसर्पति नीलग्रीवः विलोहितः ।
उत एनं गोपाः अदृशन् अदृशन् उदहार्यः ।
उत एनं विश्वा भूतानि सः दृष्टः मृडयाति नः ॥ 1.8॥

| | |
|---|---|
| असौ | (पु., अदस्, प्र.वि., ए.व.) असौ आदित्यः । |
| अवसर्पति | अव+ सृप् गतौ + वर्तमाने लट् प्र.पु., ए.व. । अपार्थे अव शब्दः । |
| नीलग्रीवः | नितराम् ईड्यते इति नीला । ईड स्तुतौ ।<br>गीर्यन्ते भावाः अनया इति ग्रीवा । गॄ निगरणे । |

| | |
|---|---|
| | नीला ग्रीवा अस्मिन् अस्ति इति नीलग्रीवः । |
| विलोहितः | विलोह्यते स्म विलोहितः । लुह कत्थनादौ । |
| उत | (अव्ययम्) = अपि च । |
| एनं | (पुं, एतद्, द्वि.वि., ए.व.) |
| गोपाः | गां = दृष्टिं, पाति इति गोपः । पा रक्षणे । |
| अदृशन् | = पश्यन्ति । दृश् प्रेक्षणे + छन्दसि लुङ् लङ् लिटः । (अष्टाध्यायी 3.4.6) |
| उदहार्यः | उत् गच्छन् हर्तुम् अशक्यः उदहार्यः । हृञ् हरणे । |
| विश्वा | विशन्ति इति विश्वा । विश प्रवेशने । |
| भूतानि | (न., भू सत्तायाम् + क्त , द्वि.वि., ब.व.) |
| सः | (पुं., तद्, प्र.वि., ए.व.) |
| दृष्टः | (पुं., दृश् प्रेक्षणे + क्त, प्र.वि., ए.व.) |
| मृडयाति | =सुखयतु । मृड् सुखने + छन्दसि (आडजादीनाम् । अष्टाध्यायी 6.4.72) |
| नः | (अस्मद्, द्वि.वि., ब.व.) = अस्मान् । |

- ✍ असौ यः = यः प्रत्यक्षं दृश्यमानः आदित्यात्मकः रुद्रः । कर्म साक्षी च ।
- ✍ अवसर्पति = लोकान्तरं गच्छति । रजस्तमोभ्यां संसृष्टं चित्तसत्त्वं देहात् देहं सञ्चरति जीवभावेन ।
- ✍ नीलग्रीवः =
    - कालकूट धारणेन नीलवर्णा ग्रीवा यस्य सः । तमोगुणोद्रेकात् आवृतप्रकाशः नीलग्रीवः ।
- ✍ विलोहितः ।
    - विशेषेण लोहित वर्णः । रजोगुणोपेतात् लोहित वर्णः ।
- ✍ एनं गोपाः अदृशन् |
    - वेद शास्त्र संस्कार रहिताः गोपालाः अपि पश्यन्ति ।
    - गावः = इन्द्रियाणि । तत्पालकाः इन्द्रियाधिपतयः गोपाः ।
- ✍ उदहार्यः अदृशन् ।
    - उदकानां हारिण्यः योषितः अपि पश्यन्ति ।
    - उत् गच्छन् हर्तुम् अशक्यः उदहार्यः । प्राण विशेषः ।

- आपो रेतो भूत्वा शिश्नं प्राविशन् ॥ (ऐतरेयोपनिषत् 1.2.4) । उदहार्यः उपलक्षितेन कर्मेन्द्रियान् सूचयन्ति ।

✍ गोपाः → ज्ञानेन्द्रियाः, उदहार्यः → कर्मेन्द्रियाः ।

- अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन् ॥ 4 ॥ (ऐतरेयोपनिषत् 1.2.4) ।
- अग्नीर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग् विवृताश्च वेदाः ।
  वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ (मुण्डकोपनिषत् 2.1.4)

✍ एनं विश्वा भूतानि

- गो-महिष्यादयः सर्वेऽपि प्राणिनः पश्यन्ति ।
- सोऽकामयत । बहु स्यां प्रजायेय+इति । स तपोऽतप्यत । स तपस् तप्त्वा । इदं सर्वम् असृजत । यदिदं किञ्च । तत् सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । (तैत्तिरीयोपनिषत् 2.6)
- एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । (तैत्तिरीयोपनिषत् 2.1)
- तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑ः । संभृ॑तं पृषदा॒ज्यम् । प॒शूꣳस्ताꣳश्च॑क्रे वाय॒व्यान्॑ । आ॒र॒ण्यान्ग्रा॒म्याश्च॒ ये । तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑ः । ऋच॒ः सामा॑नि जज्ञिरे । छन्दाꣳ॑सि जज्ञि॒रे॒ तस्मा॑त् । यजु॒स्तस्मा॑दजायत । तस्मा॒दश्वा॑ अजायन्त । ये के चो॑भ॒याद॑तः । गावो॑ ह जज्ञि॒रे॒ तस्मा॑त् । तस्मा॑ज्जा॒ता अ॑जा॒वय॑ः । (पुरुष सूक्तम्)
- यो रुद्रो अग्नौ यो अप्सु य ओषधीषु । यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥

✍ सः दृष्टः नः मृडयाति ॥

- द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्यय-अनुपश्यः । (योगसूत्रम् 2.20)
- तदर्थ एव दृश्यस्य-आत्मा । (योगसूत्रम् 2.21)
- प्रणो ह्येष यः सर्वभूतैर्विभाति विजानन् विद्वान् भवते नातिवादी ।
  आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ॥ मुण्डकोपनिषत् 3.14 ॥

- प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
  यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति ॥ (भगवद्गीता 13.30)

| | |
|---|---|
| असौ यः<br>अवसर्पति नीलग्रीवः विलोहितः ।<br>उत एनं गोपाः अदृशन्<br>अदृशन् उदहार्यः ।<br>उत एनं विश्वा भूतानि<br>सः दृष्टः मृडयाति नः ॥ | This one (compared to Sun),<br>Wandering with Dark-rays, Deep-Red-rays,<br>Cow-herds (Indriyās) see him,<br>Water-carrying girls see him.<br>And also, All beings in the world.<br>Thus Seen, bestow us the Happiness. |

Rudra created the world and entered into it as Jīvātma. These Jīvās are wandering from one body to another, due to Tamoguṇa and Rajoguṇa. While Jīva is wandering thus, He is seen by the Devatās of Indriyās, Prāṇa and pañca-bhūtās. i.e., He is spread into Indriyās, Prāṇās and Pañca-bhūtās. When his True-form is seen, as beyond these, he gives us the Bliss.

1.9 नमो॑ अस्तु॒ नील॑ग्रीवाय सहस्रा॒क्षाय॑ मीढुषे॓ ।
अथो॒ ये अ॑स्य॒ सत्वा॑नो॒ऽहं तेभ्यो॑ऽकर॒न् नम॑ः ॥

नमः अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानः अहं तेभ्यः अकरम् नमः ॥ 1.9॥

| | |
|---|---|
| अस्तु | अस भुवि + लोट् (प्र.पु., ए.व.) |
| नीलग्रीवाय | नितराम् ईड्यते इति नीला । ईड स्तुतौ ।<br>गीर्यन्ते भावाः अनया इति ग्रीवा । गॄ निगरणे ।<br>नीला ग्रीवा अस्मिन् अस्ति इति नीलग्रीवः । तस्मै नीलग्रीवाय । |
| सहस्राक्षाय | सहस्रम् अक्षि दृष्टिः यस्य सः सहस्राक्षः । तस्मै सहस्राक्षाय । |
| मीढुषे | मेहति सिञ्चति आध्यात्मिकेन इति मीढुः / मीड्वः । मिह सेचने । तस्मै मीढुषे । |
| अथो | (अव्ययम्) अपि च |

| | |
|---|---|
| ये | (पुं, यद्, प्र.वि., ए.वि.) |
| अस्य | (पुं., इदम्, ष.वि., ए.वि.) |
| सत्वानः | सतः भावः सत्त्वम् । महान्तः प्रमथगणाः । तेभ्यः सत्वानः । |
| अहम् | (अस्मद्, प्र.वि., ए.व.) |
| तेभ्यः | (पुं., तद्, च.वि., ब.व.) |
| अकरम् | = करोमि (डुकृञ् कर॑णे + छान्दसो लुङ्) । कृ-मृ-दृ-रुहिभ्यश्छन्दसि (अष्टाध्यायी 3.1.59) । |

- ✍ नीलग्रीवाय ।
    - कालकूट धारणेन नीलवर्णा ग्रीवा यस्य सः । मृत्युञ्जयः ।
    - तमोगुणोद्रेकात् आवृतप्रकाशः नीलग्रीवः । महाकालः ।
- ✍ सहस्राक्षाय ।
    - वृत्ति प्रतिबिम्बित चैतन्यम् = अक्षम् । दर्शनेन्द्रियः । उपलक्षितेन ज्ञानेन्द्रियान् सूचयति ।
    - सहस्राणि इन्द्रियाणि अस्य नियम्यतया सन्ति इति सहस्राक्षः । इन्द्रान्तर्यामी ।
    - स॒हस्र॑शीर्षा॒ पुरु॑षः । स॒ह॒स्रा॒क्षः स॒हस्र॑पात् । (पुरुष सूक्तम्)
    - स॒ह॒स्र॒शीर्॑षं दे॒वं॒ वि॒श्वाक्षं॑ वि॒श्वश॑म्भुवं । विश्वं॑ ना॒राय॑णं दे॒व॒म॒क्षरं॑ पर॒मं प॒दम् । (नारायण सूक्तम्)
    - एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।<br>खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ (मुण्डकोपनिषत् 2.1.3)
    - पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान् ।<br>ब्रह्माणमीशं कमलासनस्थ मृषींश्च सर्वानुरगांश्च दिव्यान् ॥ (भगवद्गीता 11.15)
    - सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।<br>सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ (भगवद्गीता 13.14)
- ✍ मीढुषे । मिह सेचने ।
    - प्रणत कामवर्षिणे । वृष्ट्या भुवः सेक्ता । स्त्रियां रेतः सेक्ता च ।
    - तस्मादग्निः समिधो यस्य सूर्यः सोमात् पर्जन्य ओषधयः पृथिव्याम् ।<br>पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् संप्रसूताः ॥ मुण्डकोपनिषत् 2.1.5)
    - मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।

सम्भवः सर्वभूतानां ततो भवति भारत ॥ भगवद्गीता 14.3)

- अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
  यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ (भगवद्गीता 3.14)

✍ सत्वानः ।

- महान्तः प्रमथगणाः । परमात्मनः विभूतयः ।
- नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप ।
  एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ (भगवद्गीता 10.40)
- यद्यद् विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा ।
  तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम् ॥ (भगवद्गीता 10.41)
- पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
  कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ (भगवद्गीता 13.22)

| | |
|---|---|
| नमः अस्तु<br>नीलग्रीवाय सहस्राक्षाय मीढुषे ।<br>अथो<br>ये अस्य सत्वानः तेभ्यः<br>अहं नमः अकरम् ॥ | Namaskārās to him,<br>Having Nīla-grīva,<br>Having Thousand-eyes,<br>Raining the seed of life,<br>And also,<br>To them, who are his beings.<br>I do Namaskāra. |

- Śiva, associated with Tamo-guṇa, is the cause of death (Mahā-kāla) and also saves from death as Mṛtyuñjaya. He became Nīla-griva by holding the poison in his throat.
- Śiva, associated with Sattva-guṇa, illuminates the world through Indriyās. He has thousands of eyes, hands, feet etc. So, he is called Sahasra-akṣa.
- Śiva, associated with Rajo-guṇa, is the cause of creation by placing his retas in the Prakṛti. Rain causes the Food. Food transforms into 7-dhātus in Puruṣa. Puruṣa places the retas in Prakṛti.

All the beings are his sprouts, experiencing the fruits of their Karma based on their attachment to Triguṇās.

1.10 प्रमुं॑ञ्च॒ धन्व॑न॒स्त्व मु॒भयो॒ रार्त्नि॑यो॒ र्ज्याम् ।
याश्च॑ ते॒ हस्त॒ इष॑वः॒ परा॒ ता भ॑गवो वप ॥
1.11 अ॒व॒तत्य॒ धनु॒स्तवग्ँ॑ सह॑स्राक्ष॒ शते॑षुधे ।
नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो नः॑ सु॒मना॑ भव ॥
1.12 विज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाग्ँ उ॒त ।
अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑ ॥

प्रमुञ्च धन्वनः त्वम् उभयोः आर्त्नियोः ज्याम् ।
याः च ते हस्ते इषवः परा ताः भगवः वप ॥ 1.10॥

| | |
|---|---|
| प्र+मुञ्च | प्र+ मुच् मोक्षणे (मोचने)+ लोट्, म.पु., ए.व |
| धन्वनः | (धनुः = धन्वन्, पुं, ष.वि., ए.व.) धन्वति (रुद्रं) प्रार्थयते इति धनुः । धन प्रार्थनायाम् । धवि गतौ । तस्य धन्वनः |
| त्वम् | (त्वद्, प्र.वि., ए.व.) |
| उभयोः | (त्रि., उभयः, ष.वि., द्वि.व.) |
| आर्त्नियोः | (स्त्री., आर्त्नी, ष.वि., द्वि.व.) = धनुषः कोट्योः । |
| ज्याम् | जिनाति काले शिथिली भवति इति ज्या । ज्या वयोहानौ । (स्त्री., द्वि.वि., ए.व.) |
| याः | (स्त्री यद्, प्र.वि., ब.व.) |
| ते | (युष्मद्, ष.वि., ए.व.) |
| हस्ते | हन्यते अनात्मनः इति हस्तः । हन हिंसागत्योः । तस्मिन् हस्ते |
| इषवः | (पुं, इषुः, प्र.वि., ब.व.) इष्यति (रुद्राय) गच्छति इति इषुः । इष = गतौ । |
| ताः | (स्त्री, तद्, द्वि.वि., ब.व.) |
| भगवः | रुद्र लक्षणस्य धारणाय शक्ति-ज्ञान-तेजो-वीर्य-बल-ऐश्वर्य इति षण्णां समूहः भगः । अस्मिन् तत्त्वे आध्यात्मिकतया अस्ति इति भगवान् । |
| परा+वप | पराङ्मुखीकुरु । वप् = बीजसन्ताने + लोट्, (म.पु., ए.व.) |

- ✍ धनुः = प्रणवः
- ✍ इषुः = जीवः / आत्मा
- ✍ उभयोः आर्त्न्योः = आवरण विक्षेप शक्ती । तामसः आवरण शक्तिः । राजसिकः विक्षेप शक्तिः । तयोः ।
- ✍ ज्या = अहङ्कारः । तमसश्च रजसश्च उभयोर्मध्ये बद्धः अहञ्कारः ।
- ✍ प्रमुञ्च । तमोरजोगुणेभ्याम् मोचनात्, शुद्धसत्त्वं प्रकाशयति ब्रह्माणम् । अहं भावस्य निवृत्तिः भवति, यथा च योगदर्शने—
    - विशेषदर्शिनः आत्मभाव-भावना विनिवृत्तिः (योगसूत्रम् 4.25) । तदा विवेक-निम्नं कैवल्य-प्राग्भारं चित्तम् (योगसूत्रम् 4.26) ।
    - अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।<br>परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ भगवद्गीता 8.8 ।
    - पुरुषार्थ-शून्यानां गुणानां प्रतिप्रसवः कैवल्यं, स्वरूपप्रतिष्ठा वा चितिशक्तिः इति । (योगसूत्रम् 4.34)
- ✍ हस्ते इषवः । अन्याः हन्यमानाः जीवाः ।
    - कृतार्थं प्रति नष्टम् अपि अनष्टं तद्, अन्य-साधारणत्वात् । (योगसूत्रम् 2.22)
- ✍ परा वप । परां स्थापय तान् इषून् । तान् जीवान् शुक्लगतिं नयतु, यथा पुनर्जन्म न विद्यते ।
    - शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।<br>एकया यात्यनावृत्तिम् अन्ययाऽऽवर्तते पुनः ॥ (भगवद्गीता 18.26)
    - परिणाम-ताप-संस्कार-दुःखैः गुण-वृत्ति-विरोधात् च दुःखमेव सर्वं विवेकिनः । (योगसूत्रम् 2.15)

| | |
|---|---|
| भगवः !<br>ज्याम् त्वम् प्रमुञ्च ।<br>धन्वनः उभयोः आर्त्नियोः च ।<br>ते हस्ते याः इषवः<br>ताः परा वप ॥ | O Bhagavan!<br>You please Release the string,<br>Tied to both the ends of your Bow.<br>And,<br>Whichever arrows are in your Hand,<br>Sow (Turn) them to the other side. |

- Praṇava is the Bow.
- The Arrow is the Ātman.
- The target is the Brahman.

The two ends of the Bow are the Tamo guṇa and Rajo guṇa. The string tied to the Bow is the Ahaṅkāra. i.e., Ahaṅkāra is tied between Tamo and Rajo-guṇa. When the Ahaṅkāra is untied from Tamo guṇa and Rajo guṇa, Sattva-guṇa reflects the Brahman. So, the goal is illuminated. Then, Aham becomes Brahman. Whichever arrows are still in your hand, i.e., Whichever Jīvās are still in the Māya, please release them also. Turn them to the other side, instead of Jagat. So, everyone becomes Brahman.

अवतत्य धनुः त्वं सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवः नः सुमनाः भव ॥ 1.11॥

| | |
|---|---|
| अवतत्य | अव + तन् विस्तारे + ल्यप् |
| धनुः | धन्वति (रुद्रं) प्रार्थयते इति धनुः । धन प्रार्थनायाम् । धवि गतौ । |
| त्वम् | (त्वद्, प्र.वि., ए.व.) |
| सहस्राक्ष | सहस्रम् अक्षि दृष्टिः यस्य सः सहस्राक्षः । |
| शतेषुधे | दश दशगुणं शतम् ।<br>शत प्रभाव रूपेण इषून् दधाति इति शतेषुधिः । डु धाञ् धारणपोषणयोः । |
| निशीर्य | नि + शॄ =हिंसायम् + ल्यप् । |
| शल्यानां | शलति इति शल्यः । शल चलने । तेषां शल्यानाम् । |
| मुखा | मुखानि। खन्यते अनेन इति मुखम् । खनु अवदारणे । |
| शिवः | शमयति (अनात्मनः दोषान्) इति शिवः । शमु उपशमे । |
| नः | (अस्मद्, द्वि.वि., ब.व.) = अस्मान् । |
| सुमनाः | सुष्ठु मन्यते सुमनाः । मन ज्ञाने । |
| भव | भू सत्तायाम् + + लोट्, (म.पु., ए.व.) |

✍ सहस्राक्षः । अक्षः = दर्शनेन्द्रियः ।

✍ इषुः = जीवः = प्राणः = चेतः । इषुधि = प्राणवाहिनी नाडी । इषुधि = कर्मवाहिनी = कर्माशयः ।

✍ शतेषुधे = यस्य शत इषधयः सन्ति सः शतेषुधः । शतैः कर्माशयैः जीवान् संसारोपगं गमयति ।

- शतं चैका च हृदयस्य नाड्यः तासां मूर्धानमभिनिःसृतैका ।
  तयोर्ध्वमायन्नमृतत्वमेति विश्वङ्ङन्या उत्क्रमणे भवन्ति ॥ (कठोपनिषत् 2.3.16)

✍ शल्यानां मुखाः निशीर्य = इषुगत लोहानाम् अग्राणि, दुःखप्रदानि च । तान्, निशीर्य = दुःखरहितानि भूत्वा ।

- ते ह्लाद-परिताप-फलाः पुण्यापुण्य-हेतुत्वात् । (योगसूत्रम् 2.14)
- क्लेश-मूलः कर्माशयो दृष्टादृष्ट-जन्म-वेदनीयः । (योगसूत्रम् 1.12)
- ध्यान-हेयाः तद्-वृत्तयः । (योगसूत्रम् 2.11)

✍ नः सुमनाः शिवः भव । = अस्माकम् चित्ताः वृत्तिरहिताः भवेत् । तदा योगसिद्धिः ।

- योगाङ्ग-अनुष्ठानात् अशुद्धि-क्षये ज्ञानदीप्तिः, आविवेकख्यातेः । (योगसूत्रम् 2. 28)
- समाधिसिद्धिः ईश्वरप्रणिधानात् । (योगसूत्रम् 2.45)
- स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित् कुले भवति ।
  तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ (मुण्डकोपनिषत् 3.2.9)

| | |
|---|---|
| सहस्राक्ष !<br>शतेषुधे !<br>त्वम् धनुः अवतत्य ।<br>शल्यानां मुखाः निशीर्य<br>नः सुमनाः शिवः भव ॥ | O Thousands-Eyed Rudra!<br>Having Hundreds of Arrow-cases !<br>By putting your Bow down,<br>By Flattening the Arrow-tips,<br>Purify our Citta, Make us Blissful. |

- Eye = Illuminates the World to the Ātman. He has Thousands of eyes to witness the entire World; either past, present, or even the Future. So, He is सहस्राक्षः.
- Arrow (इषुः) = Jīva / Prāna / Karma.
- Arrow-case (इषुधिः) = Holder of it, Praṇic Nerves or the Body.

From the heart, there 101 nerves spread across the body and are engaging the Individual to experience all his Karmas. Among these 101, Suṣumna is the only Nāḍi, leading the Prāṇa into Brahma-randra i.e., Kaivalya. Śiva is the leader of Prāṇa in all these Nāḍīs causing both Bandha

and Mokṣa. So, he is शतेषुधिः = having 100s of Arrow-cases. So, please put your Bow down, and flatten the arrow-tips, so that they don't harm us. i.e., Free us from our Karma-Vipāka. This makes the Citta pure and shows the truth, i.e., Śiva.

विज्यं धनुः कपर्दिनः विशल्यः बाणवान् उत ।
अनेशन् अस्य इषवः आभुः अस्य निषङ्गथिः ॥ 1.12॥

| | |
|---|---|
| विज्यं | विजिनाति इति विज्यम् । ज्या वयोहानौ । वुगत ज्याकं विज्यम् । |
| धनुः | धन्वति (रुद्रं) प्रार्थयते इति धनुः । धन प्रार्थनायाम् । धवि गतौ । |
| कपर्दिनः | कायति ज्ञानेन व्यक्तीकरोति इति कः । कै शब्दे ।<br>तस्मिन् परं पूर्तिं ददाति इति कपर्दः । डु दाञ् दाने ।<br>सः अस्य अस्ति इति कपर्दी । तस्य कपर्दिनः । |
| विशल्यः | वि+ शलति इति शल्यः । शल चलने । |
| बाणवान् | =इषुधिः । बाणाः अस्मिन् सन्ति इति बाणवान् । बण् शब्दे गतौ वा । |
| अनेशन् | आ ईष्टे इति एशन् । न एशन् अनेशन् / अनेशः । ईश ऐश्वर्ये ।<br>= नश्याः स्युः । नश् अदर्शने + छन्दसि लुङ् लङ् लिटः (अष्टाध्यायी 3.4.6) |
| अस्य | (पुं., इदम्, ष.वि., ए.वि.) |
| इषवः | (पुं, इषुः, प्र.वि., ब.व.) इष्यति (रुद्राय) गच्छति इति इषुः । इष = गतौ । |
| आभुः | आ = स्मृतौ, भवति इति आभुः / आभूः । भू सत्तायाम् ।<br>आ = ईषत्, भवति इति आभुः । = न्यूनशक्तिः अस्तु । |
| निषङ्गथिः | नितरां सज्यन्ते साधनभावाः इति निषङ्गाः । षञ्ज सङ्गे । तान् धत्ते इति निषङ्गथिः । डु धाञ् धारणपोषणयोः ।<br>= खड्गकोशः । नितरां नियमेन वा कोशेन सज्जते इति निषङ्ग = खड्गः । स निधीयते यत्र स निषङ्गथिः ।<br>= खड्गः = निषज्जते कोशः इति निषङ्गथिः ।<br>(नि + सञ्ज् सङ्गे + घथिन्) |

- कपर्दः → कम् कान्तौ । कं = सुखम् / ज्ञानम् / जलम् । जलेन पूर्तिं ददाति इति कपर्दः = जटाजुटः । कपर्दः यस्य सः = शिवः ।
  - जीवान् अमृतत्त्वं नयति सः । यथा → मृत्योर्माऽमृतं गमय ।
  - रसो वै सः । रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति । (तैत्तिरीयोपनिषत् 2.7)
  - विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति ।<br>तस्यां विसृज्यमानायां सप्त स्रोतंसि जज्ञिरे ॥ रामायाणम् 1-43-11॥
  - गामाविश्य च भूतानि धारयाम्यहमोजसा ।<br>पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ (भगवद्गीता 15.13)
- कपर्दः = अन्तःकरण प्रवृत्तिः, पुरुषाय भोगार्थं वा मोक्षार्थम् । कर्मफलप्रदाने दुःखत्रयमोचने वा, शिवः ।
  - द्रष्टृदृश्य-उपरक्तं चित्तं सर्वार्थम् । (योगसूत्रम् 4.23)
  - सत्त्व-पुरुष-अन्यता-ख्याति-मात्रस्य सर्व-भाव-अधिष्ठातृत्वं सर्व-ज्ञातृत्वं च । (योगसूत्रम् 3.49)
  - सदा ज्ञाताः चित्तवृत्तयः, तत्प्रभोः पुरुषस्य-अपरिणामित्वात् । (योगसूत्रम् 4.18)
- विज्यं धनुः
  - ज्या = अहङ्कारः । अहङ्कार-राहित्यात् प्रणवात्मकत्वम् । ज्या = वयोहानौ , विज्या = नाशराहित्यम्, अनवस्थितत्त्वादि दोष राहित्यम्, अमृतत्त्वम् ।
- विशल्यः बाणवान्
  - बाणवान् = बाणानां आश्रयः = कर्माशयः । कर्माशयः सुखदो भवेत् न तु दुःखदः ।
- अनेशन् अस्य इषवः
  - इषवः = जीवभावेन संस्काराः । व्युत्थित संस्काराणां तिरोभवः ।
  - व्युत्थान-निरोध-संस्कारयोः अभिभव-प्रादुर्भावौ निरोध-क्षण-चित्त-अन्वयो निरोध-परिणामः । (योगसूत्रम् 3.9)
- आभुः अस्य निषङ्गथिः = खड्गः ईषत् समर्थः भवेत् । खड्गः आयुध विशेषः, ईश्वरस्य माया वृत्तिः । सत्त्वगुणात् निर्गुणत्वं नेतुम् ईषत् समर्थः भवेदिति तस्य निषङ्गथिः ।
  - तदा सर्वावरण-मलापेतस्य ज्ञानस्य-आनन्त्यात् ज्ञेयम् अल्पम् । (योगसूत्रम् 4.31)
  - क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।<br>अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ (भगवद्गीता 12.5)
  - तज्जः संस्कारः अन्य-संस्कार-प्रतिबन्धी । (योगसूत्रम् 1.51)

- तस्यापि निरोधे सर्वनिरोधात् निर्बीजः समाधिः । (योगसूत्रम् 1.52)

| | |
|---|---|
| कपर्दिनः<br>धनुः विज्यं<br>बाणवान् विशल्यः उत ।<br>अस्य इषवः अनेशन्<br>अस्य निषङ्गथिः आभुः ॥ | O Kapardin,<br>String be untied from Bow.<br>Quiver be without arrows.<br>Arrows be not powerful.<br>His Sword be little powerful. |

His Māya consists of Triguṇās. His Bow is the Praṇava. From Praṇava, the entire Varṇamāla (Alphabet) has originated. So, his Bow has the power to push the Individuals into the World, or to liberate from it. When the String of Ahaṅkāra is removed from the Bow, it removes all Kleśās, and gives Kaivalya. His Arrows, i.e., Kliṣṭa-Vṛttīs, afflicting the Individuals with Karma-vipāka, shall be powerless. i.e., All the Kleśās should be burnt completely. His Sword shall be little powerful, just to destroy the Dvaita-Bhāvana. i.e., Akliṣṭa-Vṛttīs help to destroy the Kliṣṭa Vṛttīs, and illuminate the Brahman. His sword helps to transcend the Sattva-guṇa and merges the "I" with Brahman, into Nirākāra, Nirguṇa tattvās.

1.13 या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑ ।
तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑भ्भुज ॥
1.14 नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे॑ ।
उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्यां॒ तव॒ धन्व॑ने ॥
1.15 परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वतः॑ ।
अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्निधे॑हि॒ तम् ॥

या ते हेतिः मीढुष्टम हस्ते बभूव ते धनुः ।
तया अस्मान् विश्वतः त्वम् अयक्ष्मया परिब्भुज ॥ 1.13॥

| | |
|---|---|
| या | (स्त्री यद्, प्र.वि., ए.व.) |
| ते | (युष्मद्, ष.वि., ए.व.) |

| | |
|---|---|
| हेतिः | हिनोति इतस्ततो गच्छति वर्धते वा हेतिः । हि गतौ वृद्धौ च ।<br>हन्यन्ते अनात्मनः अनया इति हेतिः । हन हिंसागत्योः । |
| मीढुष्टम | मेहति सिञ्चति आध्यात्मिकेन इति मीढुः । मिह सेचने ।<br>अतिशयेन मीढुः मीढुष्टमः । |
| हस्ते | हन्यते अनात्मनः इति हस्तः । हन हिंसागत्योः । तस्मिन् हस्ते |
| बभूव | = भवति । भू सत्तायम्, छन्दसि लुङ् लङ् लिटः । (अष्टाध्यायी 3.4.6) |
| ते | (युष्मद्, ष.वि., ए.व.) |
| धनुः | धन्वति (रुद्रं) प्रार्थयते इति धनुः । धन प्रार्थनायाम् । धवि गतौ । |
| तया | (स्त्री., तद्, तृ.वि., ए.व.) |
| अस्मान् | (अस्मद्, द्वि.वि., ब.व.) |
| विश्वतः | विश्व+तस् = सर्वतः । (विश् प्रवेशने + क्वन् = विश्वः) |
| त्वम् | (युष्मद्, प्र.वि., ए.व.) |
| अयक्ष्मया | = अरोगहेतुभूतया । यक्ष्मा = रोगविशेषः । अयक्ष्मम् = आरोगता, तया ।<br>उपलक्षितेन, सर्वेषां चित्तविक्षेपाणाम् अभावः । |
| परिब्भुज | = परिपालय । परि+ भुज् पालनाभ्यवहारयोः । (लोट्, म.पु., ए.व.) |

✍ मीढुष्टम = अतिशयेन मेहति = सिञ्चति अमृतत्त्वम् । आत्यन्तिक सुखदः ।

- अथ त्रिविध दुःखात्यन्तनिवृत्तिः अत्यन्त पुरुषार्थः । (साङ्ख्यसूत्रम् 1.1)

✍ या ते हेतिः, ते हस्ते धनुः बभूव । प्रणवो धनुः, तस्मात् मोक्षदः इति । हन्यते अनेन हेतिः । त्रिगुणात्मकं प्रपञ्चं हन्ति इति, तस्मत् महाकालः इति ।

- तस्माद् अज्ञानसंभूतं हृत्स्थं ज्ञानासिनाऽऽत्मनः ।
  छित्त्वैनं संशयं योगम् आतिष्ठोत्तिष्ठ भारत ॥ (भगवद्गीता 4.42)
- एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
  अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ (भगवद्गीता 7.6)
- त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
  मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ (भगवद्गीता 7.13)
- दैवी ह्येषा गुणमयी मम माया दुरत्यया ।

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ भगवद्गीता 7.14)

✍ तया अयक्ष्मया

- यक्ष्मादि = रोगादि चित्तविक्षेपान् प्रणश्य । चित्तवृत्तीनाम् अभावे ईश्वर समापत्तिः, यथा—
  क्षीणवृत्तेः, अभिजातस्येव मणेः, ग्रहीतृ-ग्रहण-ग्राह्येषु तत्-स्थ-तत्-अञ्जनता-समापत्तिः ।
  (योगसूत्रम् 1.41) । स्मृति-परिशुद्धौ स्वरूप-शून्य-इव अर्थमात्र-निर्भासा निर्वितर्का । (योगसूत्रम्
  1.43)

✍ त्वम् अस्मान् विश्वतः परिब्भुज ॥ यथा व्याधि-स्त्यान-संशयादि चित्तविक्षेपानाम् अभावे, सत्त्वशुद्धौ,

- निर्विचार-वैशारद्ये अध्यात्म-प्रसादः । (योगसूत्रम् 1.47)
- ऋतम्भरा तत्र प्रज्ञा । (योगसूत्रम् 1.48)
- सत्त्व-पुरुष-अन्यता-ख्याति-मात्रस्य सर्व-भाव-अधिष्ठातृत्वं सर्व-ज्ञातृत्वं च । (योगसूत्रम् 3.49)
- सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
  अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ (भगवद्गीता 18.66)

| | |
|---|---|
| मीढुष्टम<br>या ते हेतिः, ते हस्ते धनुः बभूव ।<br>तया अयक्ष्मया<br>त्वम् अस्मान् विश्वतः परिब्भुज ॥ | O Rudra- Showering all the boons,<br>With your destructible weapon,<br>That bow in your Hand,<br>By dispersing all the diseases,<br>You protect us from all the aspects. |

He is the Mahā-kāla, destroying everything at the end of Pralaya with his Māya (of 3-guṇās). He is also the Śaṅkara and Mayaskara, bestowing all types of desires for his devotees. Śaṅkara fulfills the worldy desires. Mayaskara fulfills the desire for liberation. His Weapon is Māya, mixed of 3-guṇās. Sattva-guṇa removes the suffering caused by Tamo/Rajo guṇās. This Pure Sattva-guṇa reflects the Puruṣa, causes Para-Vairāgya. So, it leads to Mokṣa. So, He is the Mīḍhuṣṭama, bestowing both worldly and spiritual boons.

नमः ते अस्तु आयुधाय अनातताय धृष्णवे ।
उभाभ्याम् उत ते नमः बाहुभ्यां तव धन्वने ॥ 1.14॥

| | |
|---|---|
| आयुधाय | आ = स्मृतौ, आदौ युध्यन्ते अनेन इति आयुधम् । युध सम्प्रहारे । |
| अनातताय | अप्रसारिताय । आ = स्मृतौ, न तनुते इति अनाततम् । तनु विस्तारे । |
| धृष्णवे | धृष्टोति इति धृष्णुः । धृषा प्रागल्भ्ये । |
| उभाभ्याम् | = दक्षिणोत्तराभ्याम् (उभ + भ्याम्) |
| बाहुभ्यां | (बाहुः, ताभ्याम्) बाहते अनेन (पुरुषः आध्यात्मिक सिद्ध्यर्थं, प्रयत्नं करोति) इति बाहुः । बाहृ प्रयत्ने । |
| धन्वने | (धनुः = धन्वन्, तस्मै) धन्वति (रुद्रं) प्रार्थयते इति धनुः । धन प्रार्थनायाम् । धवि गतौ । |

✍ आयुधः = माया = त्रिगुणात्मिका । माया मूलवृक्षः, महदादि भूतेन्द्रियाः तस्य शाखाः ।

- ऊर्ध्वमूलम् अधःशाखम् अश्वत्थं प्राहुरव्ययम् ।
  छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ भगवद्गीता 15.1)
- अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
  अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥ (भगवद्गीत 15.2)
- विशेष-अविशेष-लिङ्गमात्र-अलिङ्गानि गुण-पर्वाणि । (योगसूत्रम् 2.19)
- अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशाः क्लेशाः । (योगसूत्रम् 2.3)
- अविद्या क्षेत्रम् उत्तरेषां प्रसुप्त-तनु-विच्छिन्न-उदाराणाम् । (योगसूत्रम् 2.4)
- अनाततः = न विस्तारितः । त्रिगुणानां साम्यावस्था प्रकृतिः ।
- सत्वरजस्तमसां साम्यावस्था प्रकृतिः । प्रकृतेर्महान्, महातो ऽहङ्कारः, अहङ्कारात् पञ्चतन्मात्राणि, उभयमिन्द्रियं तन्मात्रेभ्यः,स्थूलभूतानि । पुरुषः इति पञ्चविंशतिर्गणः । (सांख्यसूत्रम् 1.61)

✍ धृष्णुः = सुदृढः । स्वरूपेण प्रहर्तुं समर्थः । विदुषामपि दुस्तरः ।

- स्वरसवाही विदुषोऽपि तथा-आरूढो अभिनिवेशः । योगसूत्रम् 2.9

✍ उभाभ्यां बाहुभ्याम्

- बाहू चात्र विक्षेप+आवरणशक्ति लिङ्ग+उपादानतया जीवभावस्य तद् अधीनत्वात् । (विष्णुसूरि रुद्रभाष्यम्)
- विक्षेप शक्तिः = रजोगुणात्मिका ।
- आवरण शक्तिः = तमोगुणात्मिका ।

✍ धन्वने → प्रणवो धनुः ।

- तस्य वाचकः प्रणवः । (योगसूत्रम् 1.27)

| | |
|---|---|
| नमः अस्तु<br>ते अनातताय धृष्णवे आयुधाय ।<br>उत, नमः<br>ते उभाभ्याम् बाहुभ्यां<br>तव धन्वने ॥ | Namaskārās<br>To your Un-stretched, Powerful, Weapon<br>Also, Namaskārās<br>To your Both Hands,<br>To your Bow. |

Māya is your weapon, consisting of Triguṇās. It manifests into Mahat tattva, further extending to Ahaṅkāra and further till Indriyās and Bhutās. When the weapon is not stretched and remains stationary, i.e., Balanced state of Triguṇās, i.e., Mūla-prakṛti state. Your Maya is very powerful, even if not manifested into 24 tattvās. Your Both hands represent the Āvaraṇa (Tamas) and Vikṣepa (Rajas) śaktis of your Māya. These are the Icchā and Kriya Śaktis of Māya. The Bow represents the Praṇava, which leads the Jīva to Brahman. The pure sattvic state of Citta showing the reflection of the Brahman, and there by Viveka-Khyati arises.

परि ते धन्वनः हेतिः अस्मान् वृणक्तु विश्वतः ।
अथो यः इषुधिः तव आरे अस्मत् निधेहि तम् ॥ 1.15॥

| | |
|---|---|
| ते | (युष्मद्, ष.वि., ए.व.) |
| धन्वनः | (धनुः = धन्वन्, पुं, ष.वि., ए.व.) धन्वति (रुद्रं) प्रार्थयते इति धनुः । धन प्रार्थनायाम् । धवि गतौ । तस्य धन्वनः |
| हेतिः | हिनोति इतस्ततो गच्छति वर्धते वा हेतिः । हि गतौ वृद्धौ च ।<br>हन्यन्ते अनात्मनः अनया इति हेतिः । हन हिंसागत्योः । |
| अस्मान् | (अस्मद्, द्वि.वि., ब.व.) |
| परि+वृणक्तु | = परिवर्जयतु । परि + वृज् वर्जने (लोट्, म.पु., ए.व.) । |
| विश्वतः | विश्व+तस् = सर्वतः । (विश् प्रवेशने + क्वन् = विश्वः) |
| अथो | (अव्ययम्) अपि च |
| यः | (पुं, यद्, प्र.वि., ए.व.) |

| | |
|---|---|
| इषुधिः | इष्यति रुद्राय गच्छति इति इषुः । इष गतौ ।<br>तान् दधाति इति इषुधिः । डुधाञ् धारणपोषणयोः । |
| तव | (युष्मद्, ष.वि., ए.व.) |
| आरे | = दूरे । आ + ऋ गतौ + घञ्, (पुं, स.वि., ए.व.) ।<br>अरीणां समूहः आरः, तस्मिन् । |
| अस्मत् | (अस्मद्, पं.वि., ब.व.) |
| निधेहि | स्थापय । नितरां धेहि । नि + डुधाञ् धारणपोषणयोः (लोट, म.पु., ए.व.) |
| तम् | (पुं, तद्, द्वि.वि., ए.व.) |

- ✍ धन्वनः हेतिः → क्लेशाः ।
- ✍ विश्वतः परिवृणक्तु ।
    - ध्यानहेयाः तद्वृत्तयः । योगसूत्रम् 2.11
- ✍ इषुधिः → कर्माशयः ।
    - ते व्यक्तसूक्ष्मा गुणात्मानः । योगसूत्रम् 4.13
- ✍ अस्मत् आरे निधेहि तम् ।
    - हेतु-फल-आश्रय-आलम्बनैः संगृहीतत्वात् एषाम् अभावे तदभावः । योगसूत्रम् 4.11

| | |
|---|---|
| ते धन्वनः हेतिः<br>अस्मान् विश्वतः परिवृणक्तु ।<br>अथो तव यः इषुधिः<br>तम् अस्मत् आरे निधेहि ॥ | The weapon of your Bow,<br>Let it not pierce us from any side.<br>And, your that Quiver,<br>Please keep it far away from us. |

Māya is your weapon. Māya consists of Triguṇās. So, these are your weapons. Avidyā is the cause of Māya. Avidyā causes Kleśās. Let your weapons, pushing into this Māya Jagat, spare us forever from all sides. Quiver is the container of Arrows. i.e., Container of Jīvās / Karma-Āśaya. Your Quiver, consisting of Saṁskārās / Vāsanās caused by Triguṇās, be kept away from us.

## 3.2 द्वितीयानुवाकः

2.1 नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒

2.2 नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः पशू॒नां पत॑ये॒ नमो॒

2.3 नम॑ः स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमो॒

2.4 नमो॑ बभ्लु॒शाय॑ विव्या॒धिनेऽन्ना॑नां॒ पत॑ये नमो॒

2.5 नमो॒ हरि॑केशायोपवी॒तिने॑ पु॒ष्टानां॒ पत॑ये नमो॒

2.6 नमो॑ भ॒वस्य॑ हे॒त्यै जग॑तां॒ पत॑ये॒ नमो॒

2.7 नमो॑ रु॒द्राया॑तता॒विने॒ क्षेत्रा॑णां॒ पत॑ये॒ नमो॒

2.8 नमस्सू॒तायाह॑न्त्याय॒ वना॑नां॒ पत॑ये॒ नमो॒

2.9 नमो॒ रोहि॑ताय स्थ॒पत॑ये वृ॒क्षाणां॒ पत॑ये॒ नमो॒

2.10 नमो॑ म॒न्त्रिणे॑ वाणि॒जाय॒ कक्षा॑णां॒ पत॑ये नमो॒

2.11 नमो॑ भुव॒न्तये॑ वारिवस्कृ॒धायौष॑धीनां॒ पत॑ये॒ नमो॒

2.12 नम॑ उ॒च्चैर्घो॑षायाक्र॒न्दय॑ते पत्ती॒नाम् पत॑ये॒ नमो॒

2.13 नम॑ः कृत्स्नवी॒ताय॒ धाव॑ते॒ सत्व॑नां॒ पत॑ये॒ नम॑ः ॥2॥

| | |
|---|---|
| हिरण्यम् / हिरण्यबाहुः | हर्यति प्रकाशते इति हिरण्यम् । हर्य गतिकान्त्योः ।<br>तस्मै बाहते इति हिरण्यबाहुः । बाहृ प्रयत्ने । |
| सेनानीः | एति इनः । इण् गतौ । तेन सह वर्तते इति सेना । तां नयति इति सेनानीः । णीञ् प्रापणे । |
| दिशः / दिशां पतिः | दिशन्ति तस्मै अवकाशम् इति दिशः । दिश अतिसर्जने ।<br>ताः पाति इति पतिः । पा रक्षणे । |
| वृक्षः | व्रश्चमानात् उत्पन्नमानात् बीजात् वर्धते इति वृक्षः । ओ व्रश्चू च्छेदने । |
| हरिकेशः | सहेतुकं संसारं हरति इति हरिः । हृञ् हरणे ।<br>कायते व्यक्तीकरोति कः । तस्मिन् शेते इति केशः । शीङ् स्वप्ने ।<br>हरिश्च असौ केशश्च हरिकेशः । |
| पशुः / | पश्यते = बध्यते इति पशुः । पशूनां पतिः । पश बन्धने । |

| | |
|---|---|
| पशूनां पतिः | |
| सस्पिञ्जरः | प्साति इति सस्पिः । प्सा भक्षणे । तान् जरयति इति सस्पिञ्जरः । जॄष् वयोहानौ ।<br>पिञ्जयति इति पिञ्जरः । पिजि बले । तेन सह वर्तते इति सस्पिञ्जरः । |
| त्विषीमतिः | त्वेषते इति त्विट् । सा अस्याम् अस्ति इति त्विषीमतिः । त्विष दीप्तौ । |
| पन्थाः / पथिः / पथीनां पतिः | पन्थयति याति अनेन इति पन्थाः । पथीनां पतिः । पथि गतौ । |
| बभ्लुशः | बिभर्ति भारम् इति बभ्लुः । डु भृञ् धारणपोषणयोः ।<br>तस्मिन् शेते इति बभ्लुशः । शीङ् स्वप्ने । |
| विव्याधी | विध्यति इति विव्याधी । व्यथ ताडने । |
| अन्नम् / अन्नानां पतिः | अद्यते इति अन्नम् । अन्नानां पतिः । अद भक्षणे । |
| वीतम् / उपवीतम् | तस्य उप समीपे, व्ययते उपवीतम् । व्येञ् संवरणे । |
| भवः | भवति इति भवः । भू सत्तायाम् । |
| हेतिः | हन्यते अनया इति हेतिः । हन हिंसागत्योः । |
| जगत् / जगतां पतिः | जायते विपरिणमते क्षीयते नश्यति इति विकार गमनं यस्य तत् जगत् । जगतां पतिः । |
| आततम् / आततावी | आ =स्मृतौ ,तनोति आततम् । तनु विस्तारे ।<br>तेन अवति = रक्षति पुरुषम् इति आततावी । |
| क्षेत्रम् / क्षेत्राणां पतिः | क्षीयते इति क्षेत्रम् । क्षेत्रानां पतिः । क्षि निवास गत्योः । |
| सूतः | सुवति प्रेरयति इति सूतः । षू प्रेरणे । |
| अहन्त्यः | हन्यमाने अपि न हन्यते इति अहन्त्यः । हन गतौ । |
| वनम् / वनानां पतिः | वन्यते = याच्यते इति वनम् । वनु याचने ।<br>वनति इति वनम् । वन सम्भक्तौ । |
| रोहितः | रोहति स्म व्याप्नोति इति रोहितः । रुह बीजजन्मनि । |

| | |
|---|---|
| स्थाः / स्थपतिः | तिष्ठन्ति अर्थाः स्थाः । तान् पाति, स्थपतिः । ष्ठा गतिनिवृत्तौ । |
| मन्त्रः / मन्त्री | मन्त्रयते मन्त्रः । सः अस्य अस्ति इति मन्त्री । मत्रि गुप्तपरिभाषणे । |
| वाणिजः | पणते इति वाणिजः । पण व्यवहारे । |
| कक्षः / कक्षाणां पतिः | कष्यते अत्र इति कक्षः । कक्षाणां पतिः । कष हिंसायाम् । |
| भुवन्तिः | सर्वदा सर्वत्र भवति इति भुवन्तिः । भू सतायाम् । |
| वारिवस्कृतः | वरिवः सेवा । तां कुर्वन्ति इति वरिवस्कृतः । तेषाम् अयं वारिवस्कृतः । |
| ओषधिः / ओषाधीनां पतिः | ओषान्तं पाकान्तं ध्रियन्ते इति ओषधयः । ओषधीनां पतिः । धृञ् धारणे । |
| उच्चैःघोषः | उच्चैः घोषति विचरति इति उच्चैःघोषः । घुषिर् अविशब्दने शब्दे च । |
| आक्रन्दयत् | आक्रन्दति इति आक्रन्दयत् । क्रदि आह्वाने । |
| पत्तिः / पत्तीनां पतिः | पतति पत्तिः । पत्तीनां पतिः । पतॢ गतौ । |
| कृत्स्नवीतः | कृणत्ति व्याप्नोति इति कृत्स्नम् । कृती वेष्टने । वीयते स्म वीतः । वी कान्तौ । |
| धावत् | धावति शुद्ध्यति इति धावत् । धावृ गतिशुद्ध्ययोः । |
| सत्त्वानां पतिः | सतः भावः सत्त्वम् । सत्त्वानां पतिः । |

2.1 नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो

- हिरण्यबाहवे = With arms decorated with golden ornaments,
- सेनान्ये = Being head of the army,
- दिशां पतये च = The lord also of directions.

2.2 नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो

- वृक्षेभ्यः = In the form of trees,
- हरिकेशेभ्यः = In the form of green leaves,
- पशूनां पतये = The lord of all creatures,

2.3 नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो

- सस्पिञ्जराय = Of Tender grass colored,
- त्विषीमते = Shining with Radiance,
- पथीनां पतये = The lord of paths.

2.4 नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो

- बभ्लुशाय = Being seated on the Bull,
- विव्याधिने = Who is piercing keenly,
- अन्नानां पतये = The lord of foods.

His description, being Omnipresent, is explained as follows:

- हिरण्यबाहुः (Golden armed),
- सेनानी (Commander),
- वृक्षाः (Trees),
- हरिकेशाः (Green-leaves),
- सस्पिञ्जिरः (Tender-grass like),
- त्विषीमत् (Radiant),
- बभ्लुशः (Riding on the bull),
- विव्याधिन् (Piercing keenly),

and,

- दिशां-पतिः (Lord of directions),
- पशु-पतिः (Lord of creatures),
- पथीनां-पतिः (Lord of paths),
- अन्नानां-पतिः (Lord of foods).

Imagine like this— You are walking on a hilly region, in the countryside seeing farmers, soldiers, trees, grass, cattle, crops, sun, different types of routes to all directions, …etc. You feel the presence of Śiva in all of them: commander, trees, leaves, grass, sun, farmers, …etc; Experiencing his OMNI-PRESENCE. You see his power in all the directions, in all the creatures, in all the roads,

in all the crops/foods being grown there, …etc; Experiencing his OMNI-POTENCE. You are telling नमो नमो नमो नमो नमो again and again seeing everything, everywhere, because you are experiencing that Highest Truth directly in front of your eyes. So, you are saluting him again and again and again in all the forms, by surrendering completely.

2.5 नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो

- हरिकेशाय = Whose hair is dark (young),
- उपवीतिने = Wearing yajñopavīta,
- पुष्टानां पतये = The Lord of the nourished/strong beings.

Imagine a Young Brāhmin, who is doing the Yajñās following the Vedic rites. These Yajñās are causing the rains and nourishing all the beings.

2.6 नमो भवस्य हेत्यै जगतां पतये नमो

- भवस्य हेत्यै = Who is cutting the root/stem of Saṁsāra tree.
- जगतां पतये = The lord of all the worlds.

Imagine a Wood-Cutter, cutting trees in the forest. and interpreting that like Śiva is cutting the Saṃsāra-tree.

2.7 नमो रुद्रायाततताविने क्षेत्राणां पतये नमो

- रुद्राय = To the Rudra,
- आततताविने = Who is protecting through his stretched weapon,
- क्षेत्राणां पतये = The lord of all fields.

2.8 नमः सूतायाहन्त्याय वनानां पतये नमो नमः ॥

- सूताय = Who is the Charioteer,
- अहन्त्याय = Who Cannot be killed,
- वनानां पतये = The Lord of all Forests.

Imagine a warrior in a Chariot, with his stretched bow ready to fire the weapons, and roaming around, protecting the fields. His Charioteer is very intelligent to ride the chariot in any direction without being killed.

2.9 नमो रोहिताय स्थपतये वृक्षाणां पतये नमो

- रोहिताय = Of red colour (trees),
- स्थपतये = The form of Architects,
- वृक्षाणां पतये = The lord of trees,

Imagine an Architect, checking the reddish trees to be used as logs in the Construction, who knows all about different types of trees and buildings, bridges etc.

2.10 नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो

- मन्त्रिणे = Form of Ministers/ Counsellors,
- वाणिजाय = Form of Traders,
- कक्षाणां पतये = The lord of inaccessible terrains.

2.11 नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमो

- भुवन्तये = Spread across the earth,
- वारिवस्कृताय = Bestowing all the wealth,
- ओषधीनां पतये = The lord of Herbs.

Imagine the village heads / counsellors discussing the country affairs, and various traders in the kingdom, crossing over the in-accessible terrains like deep forests, mountains, etc., spread across the earth, creating lot of wealth in the form of vegetables, herbs etc.

2.12 नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो

- उच्चैर्घोषाय = Who is roaring loudly,
- आक्रन्दयते = Causing enemies to cry,
- पत्तीनां पतये = The lord of armies.

2.13 नमः कृत्स्नवीताय धावते सत्वनां पतये नमः ॥

- कृत्स्नवीताय = Surrounding the enemies completely,
- धावते = Running around,
- सत्वनां पतये = The lord of strength in the warriors.

Imagine the great warriors roaring loudly, running around the battle, surrounding the enemies from all the sides, and killing them. And the crying of killed enemies being heard.

## 3.3 तृतीयानुवाकः

3.1 नम॒ः सह॑मानाय निव्या॒धिन॑ आव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒

3.2 नम॑ः ककु॒भाय॑ निष॒ङ्गिणे॑ स्ते॒नानां॒ पत॑ये॒ नमो॒

3.3 नमो॑ निष॒ङ्गिण॑ इषुधि॒मते॒ तस्क॑राणां॒ पत॑ये॒ नमो॒

3.4 नमो॒ वञ्च॑ते परि॒वञ्च॑ते स्तायू॒नां पत॑ये॒ नमो॒

3.5 नमो॑ निचे॒रवे॑ परिच॒रायार॑ण्यानां॒ पत॑ये॒ नमो॒

3.6 नम॑ः सृका॒विभ्यो॒ जिघाग्ँ॑सद्भ्यो मुष्ण॒तां पत॑ये॒ नमो॒

3.7 नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒चर॑द्भ्यः प्रकृ॒न्तानां॒ पत॑ये॒ नमो॒

3.8 नम॑ उष्णी॒षिने॑ गिरिच॒राय॑ कुलु॒ञ्चानां॒ पत॑ये॒ नमो॒

3.9 नम॒ इषु॑मद्भ्यो धन्वा॒विभ्य॑श्च वो॒ नमो॒

3.10 नम॑ आतन्वा॒नेभ्य॑ः प्रति॒दधा॑नेभ्यश्च वो॒ नमो॒

3.11 नम॑ आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नमो॒

3.12 नमोऽस्य॑द्भ्यो॒ विध्य॑द्भ्यश्च वो॒ नमो॒

3.13 नम॒ आसी॑नेभ्य॒ः शया॑नेभ्यश्च वो॒ नमो॒

314 नम॑ः स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमो॒

3.15 नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नमो॒

3.16 नम॑ः स॒भाभ्य॑ः स॒भाप॑तिभ्यश्च वो॒ नमो॒

3.17 नमो॒ अश्वे॒भ्योऽश्व॑पतिभ्यश्च वो॒ नम॑ः ॥3॥

| | |
|---|---|
| सहमानः | सह मानयति इति सहमानः । मान पूजायाम् । |
| निव्याधी | नितरां विशेषेण आसमन्तात् धत्ते निव्याधी । डु धाञ् धारणपोषणयोः । |
| आव्याधी / आव्याधिनीनां पतिः | आविध्यति असौ इति आव्याधी । आव्याधिनीनां पतिः । व्यध ताडने । |
| कुकुभः | कायते व्यज्यते इति कः । तेन स्कुभ्नन्ति द्योतन्ति सर्वाणि इति कुकुभः । कै शब्दे । |
| निषङ्गिन् | सज्यते इति निषङ्गिन् । षञ्ज सङ्गे । |

| | |
|---|---|
| स्तेनः / स्तेनानां पतिः | स्तेनयति इति स्तेनः । स्तेनानां पतिः । स्तेन चौर्ये । |
| इषुधिमत् | इष्यति तस्मै गच्छति इति इषुः । तं धत्ते इति इषुधिः । तल्लक्षणः अस्मिन् अस्ति इति इषुधिमत् । इष गतौ । |
| तस्करः / तस्कराणां पतिः | तत् करोति इति तस्करः । तस्कराणां पतिः । डु कृञ् करणे । |
| वञ्चत् / परिवञ्चत् | वञ्चयते इति वञ्चत् । वञ्चु प्रलम्भने । परितः वञ्चयते इति परिवञ्चत् । |
| स्तायुः /स्तायूनां पतिः | स्तायते अलङ्क्रियते इति स्तायुः । स्तायूनां पतिः । ष्टै शोभायाम् । |
| निचेरुः | निभृतं नितराम् चरणशीलः । |
| परिचरः | परितः चरति इति परिचरः । चर गतौ । |
| अरण्यम् / अरण्यानां पतिः | इयर्ति अत्र इति अरण्यम् । अरण्यानां पतिः । ऋ गतौ । |
| सृकावी | सरति गच्छति / प्राप्नोति इति सृकः । सृ गतौ । तं अवति इति सृकावी । अव रक्षणे । |
| जिघांसत् | हन्तुम् इच्छति इति जिघांसत् । हन हिंसागत्योः । |
| मुष्णत् / मुष्णतां पतिः | मुष्णाति गुप्तेन गृह्णाति इति मुष्णत् । मुष्णतां पतिः । मुष स्तेये । |
| असिमत् | अस्यते क्षिप्यते इति असिः । सः अस्मिन् अस्ति इति असिमत् । असु क्षेपणे । |
| नक्तञ्चरः | राति मिलति इति रात्रिः । रा दाने । तस्यां चरति इति रात्रिञ्चरः । चर गतौ । |
| प्रकृन्तः | प्रकर्षेण कृनत्ति छिद्यति इति प्रकृन्तः । प्रकृन्तानं पतिः । कृती च्छेदने । |
| उष्णीषन् | ओषति अकार्यम् इति उष्णः । उष दाहे ।<br>श्रेयोभिलाषया तम् इषति इति उष्णीषन् । इष इच्छायाम् । |
| गिरिचरः | गिरति वेद प्रमाणानि वैदिकबोधान् च इति गीः । गॄ निगरणे । तस्मिन् गिरि चरति इति गिरिचरः । चर गतौ । |
| कुलुञ्चः / | कुत्सितं लुञ्चति इति कुलुञ्चः । कुलुञ्चानां पतिः । लुञ्च अपनयने । |

| | |
|---|---|
| कुलुञ्चानां पतिः | |
| इषुमत् | इष्यति गच्छति इति इषुः । सः अस्मिन् अस्ति इति इषुमत् । इष गतौ । |
| धन्वाविन् | धनति प्रार्थयते इति धनुः । सः अस्मिन् अस्ति इति धन्वाविन् । धन प्रार्थनायाम् । |
| आतन्वानः | आ समन्तात् तनुते विस्तरते इति आतन्वानः । तनु विस्तारे । |
| प्रतिदधानः | प्रति सम्मत्यांम्, तं धत्ते इति प्रतिदधानः । डु धाञ् धारणपोषणयोः । |
| आयच्छत् | आ स्मृतौ, यच्छति इति आयच्छत् । यम उपरमे । |
| विसृजत् | विसृजति त्यजति विसृजत् । सृज विसर्गे । |
| अस्यत् | अस्यति इति अस्यत् । असु क्षेपणे । |
| विध्यत् | विध्यति स्वयम् इति विध्यत् । विध बन्धने । |
| आसीनः | आस्ते इति आसीनः । आस उपवेशने । |
| शयानः | शेते इति शयानः । शीङ् स्वप्ने । |
| स्वपत् | स्वपिति इति स्वपत् । ञि ष्वप् स्वप्ने । |
| जाग्रत् | जागर्ति इति जाग्रत् । जागृ निद्राक्षये । |
| तिष्ठत् | तिष्ठति इति तिष्ठत् । ष्ठा गतिनिवृत्तौ । |
| धावत् | धावति शुद्ध्यति इति धावत् । धावृ गतिशुद्ध्ययोः । |
| सभाः / सभापतिः | सम्यक् भान्ति इति सभाः । भा दीप्तौ । |
| अश्वः | अश्नुते गमनेन इति अश्वः । अशू व्याप्तौ । |

3.1 नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो

- सहमानाय = Able to withstand enemies,
- निव्याधिने = Capable of striking enemies,
- आव्याधिनीनां पतये = The lord of attackers.

He is the Lord of those attackers, who can strike the enemies very well, and can bear/withstand all the hurdles.

3.2 नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो

- ककुभाय = Who is very Tall,

- निषङ्गिणे = Holding a sword,
- स्तेनानां पतये = The lord of thieves (stealing secretly).

He is the Lord of those thieves, who steal the people's wealth secretly, who are very tall, and holding the swords.

3.3 नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो

- निषङ्गिणे = With an arrow in hand to fire,
- इषुधिमते = Having quiver of arrows,
- तस्कराणां पतये = The lord of robbers (stealing openly).

He is the Lord of those robbers, who openly loot the people, holding weapons in their hands and quivers on their shoulders.

3.4 नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो

- वञ्चते = Who cheats, when he gets a chance;
- परिवञ्चते = Who always cheats in all matters;
- स्तायूनां पतये = The lord of deceitful stealers.

He is the Lord of those deceitful stealers, some act like trusted and cheat when they get a chance, some are always cheating and stealing in all matters.

3.5 नमो निचेरवे परिचरायारण्यानां पतये नमो

- निचेरवे = One, going alertfully for stealing,
- परिचराय = one, hovering around the marketplaces for stealing,
- आरण्यानां पतये = The lord of Forest-thieves.

He is the Lord of the forest-thieves, who are walking very alert fully, and hovering around the market-places for stealing.

3.6 नमः सृकाविभ्यो जिघासद्भ्यो मुष्णतां पतये नमो

- सृकाविभ्यः = Bearing weapons to protect himself,

- जिघांसद्भ्यः = Desirous to kill the opponents,
- मुष्णतां पतये = The lord of those stealing grains from the crops.

He is the Lord of those thieves, stealing grains from the crops, by holding weapons to protect themselves, and killing anyone opposing them.

3.7 नमो ऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो

- असिमद्भ्यः = Wielding swords,
- नक्तंचरद्भ्यः = Wandering in the Night-times,
- प्रकृन्तानां पतये = Lord of the Butchers, who cut the others and steal their belongings.

He is the lord of those Butchers, who are wielding swords, wandering in the nights, and cutting the enemies heads for stealing their belongings.

3.8 नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमः ॥

- उष्णीषिणे = Who wear head-turbans like noble-men in Villages,
- गिरिचराय = Who are roaming around the mountains,
- कुलुञ्चानां पतये = The lord of those, grabbing others' houses / farms.

He is the lord of them, who forcefully grab the others' houses and farms, either they roam in the forests, or living in the villages like noble-men wearing head-turbans.

3.9 नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो

- इषुमद्भ्यः = To those who have arrows in hand,
- धन्वाविभ्यः = those who have bows in hand

3.10 नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो

- आतन्वानेभ्यः = To those who string the bow,
- प्रतिदधानेभ्यः = those who string the arrow to the bow,

3.11 नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो

- आयच्छद्भ्यः = To those who pull the bow-string,
- विसृजद्भ्यश्च = those who pull and discharge arrows

3.12 नमो ऽस्यद्भ्यो विद्ध्यद्भ्यश्च वो नमो

- अस्यद्भ्यः = To those who throw arrows up to the desired aim,
- विद्ध्यद्भ्यः = those who strike at the desired aim,

These four lines are describing the 8-stages of Abhyāsa to attain Brahman. Here, Arrow = Citta. Bow = Praṇava. Target = Brahman. The Process of, how Citta is set on the bow of Praṇava, to merge with the Target- Brahman, is explained in these 8-steps.

1) इषुमत् = Holding the arrows.
    - The five Yamās - hold the Citta from going outwards.
2) धन्वाविन् = Holding the Bow.
    - The five Niyamās - help to understand Praṇava as Brahman.
3) आतन्वानः = Stringing the Bow.
    - Āsana - Helps to prepare the Citta to align with Praṇava.
4) प्रतिदधानः = Fixing the arrow on the Bow.
    - Prāṇāyāma - Aligns the Citta with Praṇava.
5) आयच्छत् = Pulling the Bow-string.
    - Pratyāhāra - Withdraws the Citta from external sensory objects.
6) विसृजत् = Releasing the arrow.
    - Dhāraṇa - Citta concentrates on Praṇava.
7) अस्यत् = Arrow going towards Target.
    - Dhyāna - Citta attains Dhyāna state without Distractions.
8) विध्यत् = Arrow hitting the target.
    - Samādhi - Citta is absorbed into Brahman.

3.13 नम आसीनेभ्यः शयानेभ्यश्च वो नमो

- आसीनेभ्यः = To those who are sitting,
- शयानेभ्यश्च = Those who are lying down,

3.14 नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो

- स्वपद्भ्यः = To those who are sleeping,

- जाग्रद्भ्यश्च = Those who are awake

3.15 नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो

- तिष्ठद्भ्यः = To those who are standing,
- धावद्भ्यस्च = Those who are running

These are the different types of movements in this Cosmos. Sitting / Lying / Sleeping / Awaken / Standing / Running etc. All these movements are the "Karma" aspects of Śiva.

3.16 नमः सभाभ्यः सभापतिभ्यश्च वो नमो

- सभाभ्यः = To those who are seated in assemblies,
- सभापतिभ्यश्च = Leaders of those assemblies

Assembly is a group of people. i.e., group of Saṁskārās. Leader of the assembly - Leader of those saṁskāras. The group of Saṁskārās and their master Saṁskāra - both are the aspects of Śiva.

3.17 नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥

- अश्वेभ्यः = To those who are in the form of horses,
- अश्वपतिभ्यश्च = The masters of those horses,

Aśva also indicates a ray, which pervades. So, the rays of Vāsanās that lead the Jīva into Saṁsāra. Śiva is the also the lord of those Vāsana rays.

Primarily, the entire world has 3-aspects: 1) Dravya, 2) Guṇa and 3) Karma.

1) Dravya = Substance. i.e., made of 5-bhūtās, dik, manas, kāla and ātman.
2) Guṇa = Their qualities such as Śabda, Sparśa, Rūpa, Rasa, Gandha, Sukha, Duḥkha, Icchā, Dveṣa, Laghu, Guru, …etc. Vaiśeṣika darśana mentions 24 such guṇās.
3) Karma = The movements of matter like going upwards, downwards, etc...

In these mantras of 2nd and 3rd anuvākas, the description of Paramātman in these 3-aspects of Dravya-Guṇa-Karma and their lord-ship is glorified.

## 3.4 चतुर्थानुवाकः

4.1 नम॑ आव्या॒धिनी॑भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒

4.2 नम॒ उग॑णाभ्यस्तृग्ं॒ हतीभ्य॑श्च वो॒ नमो॒

4.3 नमो॑ गृ॒त्सेभ्यो॑ गृ॒त्सप॑तिभ्यश्च वो॒ नमो॒

4.4 नमो॒ व्राते॑भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒

4.5 नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒

4.6 नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒

4.7 नमो॑ म॒हद्भ्य॑ः क्षुल्ल॒केभ्य॑श्च वो॒ नमो॒

4.8 नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नमो॒

4.9 नमो॒ रथे॑भ्यो॒ रथ॑पतिभ्यश्च वो॒ नमो॒

4.10 नम॒ः सेना॑भ्यः सेना॒निभ्य॑श्च वो॒ नमो॒

4.11 नम॑ः क्ष॒त्तृभ्य॑ः संग्रही॒तृभ्य॑श्च वो॒ नमो॒

4.12 नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒

4.13 नम॒ः कुला॑लेभ्यः क॒मारे॑भ्यश्च वो॒ नमो॒

4.14 नम॑ः पुञ्जि॒ष्टे॑भ्यो निषा॒देभ्य॑श्च वो॒ नमो॒

4.15 नम॑ इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒ नमो॒

4.16 नमो॑ मृग॒युभ्य॑ः श्व॒निभ्य॑श्च वो॒ नमो॒

4.17 नम॒ः श्वभ्य॒ः श्वप॑तिभ्यश्च वो॒ नम॑ः ॥4॥

| | |
|---|---|
| आव्याधिनी | आ स्मृतौ, विध्यति इति आव्याधिनी । व्यध ताडने । |
| विविधन्ती | विशेषेण विध्यन्ति इति विविधन्ती । व्यध ताडने । |
| उगणः | उ = उत्कृष्टेन गण्यते अनेन इति उगणः । गण सङ्ख्याने । |
| तृंहती | तृह्यते अनया इति तृंहती । तृह हिंसायाम् । |
| गृत्सः / गृत्सपतिः | गृध्यति = अभितः काङ्क्षति इति गृत्सः । गृधु अभिकाङ्क्षायाम् । |
| व्रातः / व्रातपतिः | वृणीते इति व्रातः । वृङ् सम्भक्तौ । |
| गणः / गणपतिः | गणयते इति गणः । गण सङ्ख्याने । |

| | |
|---|---|
| विरूपः | रोपयति = विमोहयति इति विरूपः । रुप विमोहने ।<br>विरूपयति विगतरूपं करोति इति विरूपः । रूप क्रियायाम् । |
| विश्वरूपः | विशति इति विश्वः । तेन रोपयति इति विश्वरूपः । विश प्रवेशने । |
| महत् | मह्यते पूज्यते अनेन इति महत् । मह पूजायाम् । |
| क्षुल्लकः | क्षुद्यन्ते पीड्यन्ते अनेन इति क्षुल्लकः । क्षुदिर् सम्पेषणे । |
| रथः/ अरथः/<br>रथिः/ रथपतिः/<br>रथकारः | रमते अत्र रथः । तं करोति इति रथकारः । न रमते अत्र इति अरथः । रमु क्रीडायाम् । |
| क्षत्ता | क्षदति हन्ति इति क्षत्ता । क्षद हिंसायाम् । |
| तक्षा | तक्ष्णोति तनूकरोति तक्षा । तक्षू तनूकरणे । |
| कुलालः | कुं = भूमिः आलडति इति कुलालः । लड मर्दने । |
| कर्मारः | कर्म इयर्ति इति कर्मारः । ऋ गतौ । |
| पुञ्जी / पुञ्जिष्टः | पुंसः जायते पुञ्जी । जनी प्रादुर्भावे । तान् वेष्टयति इति पुञ्जिष्टः । ष्टै वेष्टने । |
| निषादः | नितरां सीदति इति निषादः । षद्लृ विशरणे । |
| इषुकृत् | इष्यति गच्छति इति इषुः । तं करोति इति इषुकृत् । इष गतौ । |
| धन्वकृत् | धन्वति गच्छति इति धन्वः । तत् करोति इति धन्वकृत् । धवि गतौ । |
| मृगः / मृगयुः | मृग्यते अन्विष्यते इति मृगः । मृग अन्वेषणे । तं याति इति मृगयुः । या प्रापणे । |
| श्वा / श्वपतिः | श्वयति वर्धते रुद्रभावः श्वा । शुनः पाति इति श्वपतिः । ओश्वि वृद्धौ । |

4.1 नम आव्यधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो

- आव्याधिनीभ्यः = The women capable of attacking on all four sides,
- विविध्यन्तीभ्यश्च = The women capable of attacking in different ways.

4.2 नम उगणाभ्यस्तृंहतीभ्यश्च वो नमो

- उगणाभ्यः = Of the form of superior groups like ‘Sapta Matṛkās’,
- तृँहतीभ्यः = and fearful Devatās adept in torturing, like Durga.

4.3 नमो गृत्सेभ्यो ग्रुत्सपतिभ्यश्च वो नमो

- गृत्सेभ्यः = Of the form of those who are attached to sense objects,

- गृत्सपतिभ्यः = and those who protect them.

4.4 नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो

- व्रातेभ्यः = Of the form of persons of different occupations,
- व्रातपतिभ्यश्च = and those who protect them.

4.5 नमो गणेभ्यो गणपतिभ्यश्च वो नमो

- गणेभ्यः = Being Pramatha-gaṇās,
- गणपतिभ्यश्च = and protectors of those Gaṇās.

4.6 नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो

- विरूपेभ्यः = Having distorted forms
- विश्वरूपेभ्यः = Being in all the forms.

4.7 नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो

- महद्भ्यः = Being great persons having Siddhis like Aṇimā,
- क्षुल्लकेभ्यश्च = and persons with no such attributes,

4.8 नमो रथिभ्योऽरथेभ्यश्च वो नमो

- रथिभ्यः = Of the form of those sitting in the chariots,
- अरथेभ्यः = and those with no chariots (and walking on foot),

4.9 नमो रथेभ्यो रथपतिभ्यश्च वो नमो

- रथेभ्यः = the form of chariots,
- रथपतिभ्यः = the lords of the chariots.

4.10 नमस्-सेनाभ्यः सेननिभ्यश्च वो नमो

- सेनाभ्यः = The Form of armies,
- सेननिभ्यः = The army commanders.

4.11 नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो

- क्षत्तृभ्यः = Those, who are the chariot drivers/attendants,
- संग्रहीतृभ्यः = Those holding the reins of Chariot-horses,

4.12 नमस्-तक्षभ्यो रथकारेभ्यश्च वो नमो

- तक्षभ्यः = The form of carpenters,

- रथकारेभ्यः = The chariot builders (makers).

4.13 नमः कुलालेभ्यः कमरिभ्यश्च वो नमो

- कुलालेभ्यः = The form of potters,
- कमरिभ्यः = The blacksmiths.

4.14 नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो

- पुञ्जिष्टेभ्यः = Bird hunters,
- निषादेभ्यः = fishermen.

4.15 नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो

- इषुकृद्भ्यः = arrow makers,
- धन्वकृद्भ्यः = bow makers.

4.16 नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो

- मृगयुभ्यः = Animal hunters,
- श्वनिभ्यः = Holding Hunting dogs.

4.17 नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ।

- श्वभ्यः = the form of dogs,
- श्वपतिभ्यः = protectors of dogs.

## 3.5 पञ्चमानुवाकः

5.1 नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒

5.2 नमः॑ श॒र्वाय॑ च पशु॒पत॑ये च॒

5.3 नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒

5.4 नमः॑ कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒

5.5 नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒

5.6 नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒

5.7 नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒

5.8 नमो॑ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒

5.9 नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒

5.10 नमो॑ वृ॒द्धाय॑ च सं॒वृध्व॑ने च॒

5.11 नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒

5.12 नम॑ आ॒शवे॑ चाजि॒राय॑ च॒

5.13 नम॒ः शीघ्रि॑याय च॒ शीभ्या॑य च॒

5.14 नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒

5.15 नमः॑ स्रोत॒स्या॑य च॒ द्वीप्या॑य च ॥5॥

| | |
|---|---|
| शर्वः | शृणाति हिनस्ति इति शर्वः । शॄ हिंसायाम् । |
| नीलग्रीवः | नितराम् ईड्यते नीला । ईडा स्तुतौ । गिरति ग्रीवा । नीला ग्रीवा यस्य सः नीलग्रीवः । गॄ निगरणे । |
| शितिकण्ठः | शीयते इति शितिः । शिति शोधने । तेन कणति धनति इति शितिकण्ठः । कण शब्दे । |
| व्युप्तकेशः | विशेषेण उप्यन्ते इति व्युप्ताः । टु वप् बीजसन्ताने ।<br>कायति इति कः । कै शब्दे । तस्मिन् शेरते वर्तते इति केशाः । शीङ् स्वप्ने ।<br>व्युप्ताः केशाः यस्मिन् सः व्युप्तकेशः । |
| सहस्राक्षः | दश दशगुणं शतम् । शत दशगुनं सहस्रम् । सहस्रम् अक्षि दृष्टिः यस्य सः सहस्राक्षः । |
| शतधन्वा | शतं धन्वति प्राप्नोति इति शतधन्वा । धवि गतौ । |

| | |
|---|---|
| गिरिशः | गिरति इति गीः । गॄ निगरणे । तस्मिन् शेते इति गिरिशः । शीङ् स्वप्ने । |
| शिपिविष्टः | श्यति तनूकरोति इति शि । शो तनूकरणे । शि पिबन्ति इति शिपयः । पा पाने । शिपीन् विशति इति शिपिविष्टः । विश प्रवेशने । |
| मीढुः / मीडुष्टमः | मेहति सिञ्चति मीढुः । तेन उत्तमः भवति इति मीढुष्टमः । मिह सेचने । |
| इषुमत् । | इष्यति गच्छति इति इषुः । सः लक्षणः अस्मिन् अस्ति इति इषुमत् । इष गतौ । |
| ह्रस्वः | ह्रसति सूक्ष्मरूपो भवति इति ह्रस्वः । ह्रस ह्रासे । |
| वामनः | वा विकल्पेन मन्यते इति वामनः । |
| बृहत् | बर्हति वर्धयति इति बृहत् । बृह वर्धने । |
| वर्षीयः | अतिशयेन वर्धते वर्षीयः । वृधु वृद्धौ । |
| वृद्धः | वर्धते इति वृद्धः । वृधु वृद्धौ । |
| संवृध्वा | वेदादिषु स्तोत्रैः वर्धते इति । स्वयं समृद्धिना सर्वभूतेषु वर्धते इति च संवृध्वा । वृधु वृद्धौ । |
| अग्रियः | अग्रे भवः अग्रियः । |
| प्रथमः | प्रथते इति प्रथमः । प्रथ प्रख्याने । |
| आशुः | अश्नुते अनेन इति आशुः । अशू व्याप्तौ । |
| अजिरः | अजन्ति क्षिपन्ति गच्छन्ति इति अजिरः । अज गतिक्षेपणयोः । |
| शीघ्रियः | शिं शयनं तमसं, जिघ्रति हरति इति शीघ्रियः । घ्रा गन्धोपादने । |
| शीभ्यः | शीभः = जलप्रवाहः, ज्ञानप्रसरणः, अस्मिन् अस्ति इति शीभ्यः । |
| ऊर्म्यः | ऋच्छति गच्छति इति ऊर्मिः । सः अस्मिन् अस्ति इति ऊर्म्यः । ऋ गतौ । |
| अवस्वन्यः | अव विगत स्वनरूपः अवस्वनः । तत्र भवः अवस्वन्यः । |
| स्रोतस्यः | सरति इति स्रोतः । तस्य प्रवर्तमानः स्रोतस्यः । सृ गतौ । |
| द्वीप्यः | द्विधागतः अस्मिन् इति द्वीपः । तत्र भवः द्वीप्यः । |

5.1 नमो भवाय च रुद्राय च

- Cause of creation and liberation

5.2 नमः शर्वाय च पशुपतये च

- Cause of destruction and bondage

5.3 नमो नीलग्रीवाय च शितिकण्ठाय च

- Having Black-throat, White throat.

5.4 नमः कपर्दिने च व्युप्तकेशाय च

- Having Matted-locks and also Shaven-heads,

5.5 नमः सहस्राक्षाय च शतधन्वने च

- Puruṣa having: Thousands-eyes and Hundred bows

5.6 नमो गिरिशाय च शिपिविष्टाय च

- गिरिशः = Who is dwelling over mountains (Kailāśa),
- शिपिविष्टः = Who pervades everything through his light-rays.

5.7 नमो मीढुष्टमाय चेषुमते च

- मीढुष्टमः = Who is Showering the rain of boons,
- इषुमान् = Who is the Possessor of all arrows.

5.8 नमो ह्रस्वाय च वामनाय च

- ह्रस्वः = Who is very Small in size (Puruṣa is just Thumb-size residing in the heart region, called as अङ्गुष्टमात्र पुरुषः),
- वामनः = Who is a Dwarf.

5.9 नमो बृहते च वर्षीयसे च

- बृहत् = Who has a very large form,
- वर्षीयस् = He is the most Superior to all gods.

5.10 नमो वृद्धाय च संवृध्वने च

- वृद्धः = Who is the Oldest of all (सः पूर्वेषाम् अपि गुरुः),
- संवृध्वन् = Who is Praised by the scriptures.

Śiva is the dwelling in the Kailāśa mountain, but spread over the entire cosmos through his rays of illumination. Possessing innumerable arrows, he is like a cloud showering the boons on the devotees. He is the shortest of all, largest of all. अणोरणीयान् महतो महीयान् । He is so small that he resides within the caves of the heart region, in the size of Thumb. So, he is glorified as Aṅguṣṭa-mātra-purusha (अङ्गुष्टमात्र पुरुषः). He is bigger than the mount Meru, whom all the gods surround

upon. He is the oldest of all gods, as explained in Yogasūtra - सः पूर्वेषाम् अपि गुरुः । and is praised by the Vedas and Upaniṣads.

5.11 नमो अग्रियाय च प्रथमाय च

- अग्रियः = Who exists, even before the creation.
- प्रथमः = He is the First to be counted.

He is the Brahman, who exists beyond the Creation. He is also the Hiraṇyagarbha (Mahat-tattva), the first creation in Prakṛti.

5.12 नम आशवे चाजिराय च

- आशुः = He is All pervasive,
- अजिरः = His movements are Agile/Quick/Rapid to go Anywhere,

5.13 नमः शीघ्रियाय च शीभ्याय च

- शीघ्रियः = He is in Quick-flowing waters,
- शीभ्यः = He is in Rushing-cascades (kind of Waterfalls)

5.14 नम ऊर्म्याय चावस्वन्याय च

- ऊर्म्यः = He is in the Waves of the Waters,
- अवस्वन्यः = He is in Serene (Waveless) Waters.

5.15 नमः स्रोतस्याय च द्वीप्याय च ॥

- स्रोतस्यः = He is the Flows of waters,
- द्वीप्यः = He is in the Islands.

The lines 5.12 till 5.15 explains his presence in various types of water-bodies. His Omnipresence, yet his agile movements, his quick-flowing nature, and his flow into rushing-cascades, his existence in both wavy and serene waters, He is not only in the water flows, but also the islands. Here actually, waters - Jala tattva, indicates the emotions. Various kinds of emotions, and the Saṁskārās/ Vāsanās causing those emotions.

## 3.6 षष्टानुवाकः

6.1 नमो॑ ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒

6.2 नम॑ः पूर्व॒जाय॑ चापर॒जाय॑ च॒

6.3 नमो॑ मध्य॒माय॑ चापग॒ल्भाय॑ च॒

6.4 नमो॑ जघ॒न्या॑य च॒ बुध्नि॑याय च॒

6.5 नम॑ः सो॒भ्या॑य च प्रतिस॒र्या॑य च॒

6.6 नमो॒ याम्या॑य च॒ क्षेम्या॑य च॒

6.7 नम॑ उर्व॒र्या॑य च॒ खल्या॑य च॒

6.8 नम॒ः श्लोक्या॑य चाऽवसा॒न्या॑य च॒

6.9 नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒

6.10 नम॑ः श्र॒वाय॑ च प्रतिश्र॒वाय॑ च॒

6.11 नम॑ आ॒शुषे॑णाय चा॒शुर॑थाय च॒

6.12 नम॒ः शूरा॑य चावभिन्द॒ते च॒

6.13 नमो॑ व॒र्मिणे॑ च वरू॒थिने॑ च॒

6.14 नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒

6.15 नम॑ः श्रु॒ताय॑ च श्रुतसे॒नाय॑ च ॥ 6॥

| | |
|---|---|
| ज्येष्टः | अतिशयेन प्रशस्त्यः ज्येष्ठः । |
| कनिष्टः | अतिशयेन अल्पः इति कनिष्ठः । |
| पूर्वजः | पूर्वे जायते गोचरति इति पूर्वजः । जनी प्रादुर्भावे । |
| अपरजः | अपरे जायते अवशिष्यते इति अपरजः । |
| मध्यमः | मध्ये प्रवर्तते इति मध्यमः । (मन्यते इति मध्यम् । मन ज्ञाने ।) |
| अपगल्भः | अप = व्यतिरेकेण गल्भते अपगल्भः । गल्भ दार्ष्ट्ये । |
| जघन्यः | हन्यते ताड्यते इति जघनम् । तस्मिन् भाव जघन्यः । हन हिंसागत्योः । |
| बुध्नियः | बुधन्ते सर्वम् अनेन इति बुध्नः । तस्मिन् भवः बुध्नियः । बुध अवगमने । |
| सोभ्यः | उभाभ्यां = द्वन्द्वाभ्यां सह वर्तते इति सोभः । तत्र भवः सोभ्यः । |

| | |
|---|---|
| प्रतिसर्यः | प्रति सरति इति प्रतिसरः । तत्र भवः प्रतिसर्यः । |
| याम्यः | यमयति इति यमः । तत्र भवः याम्यः । यम उपरमे । |
| क्षेम्यः | क्षिणोति अशुभम् इति क्षेमम् । क्षिणु हिंसायाम् ।<br>क्षियति वसति अस्मिन् शुभान् इति क्षेमम् । क्षि निवासगत्योः । तस्य योग्यः क्षेम्यः । |
| उर्वर्यः | उर्वति क्षुधं हिनस्ति इति उर्वरः । तत्र भवः उर्वर्यः । उर्वी हिंसायाम् । |
| खल्यः | खलति बलान् सर्वान् सञ्चयति इति खलः । तत्र भवः खल्यः । खल सञ्चये । |
| श्लोक्यः | श्लोक्यते इति श्लोकः । तत्र भवः श्लोक्यः । श्लोकृ सङ्घाते । |
| अवसान्यः | अवसाने वेदान्ते भवः अवसान्यः । |
| वन्यः | वन्यते याच्यते इति वनम् । वनु याचने । वन्यते सेव्यते वा वनम् । वन सम्भक्तौ । तत्र भवः वन्यः । |
| कक्ष्यः | कषति हिनस्ति इति कक्षः । तत्र भवः कक्ष्यः । कष हिंसायाम् । |
| श्रवः /<br>प्रतिश्रवः | श्रूयते इति श्रवः । शृणोति अनेन इति श्रवः ।<br>प्रतिध्वनिः सः श्रूयते इति प्रतिश्रवः । श्रु श्रवणे । |
| आशुषेणः | आशु = शीघ्रगतिना, सह एति इति आशुषेणः । इण् गतौ । |
| आशुरथः | आशु = अचिरकाले, रमन्ते अत्र इति आशुरथः । रमु क्रीडायाम् । |
| शूरः | शूरयति इति शूरः । शूर विक्रान्तौ । |
| अवभिन्दत् | अवभिनत्ति इति अवभिन्दत् । भिदिर् विदारणे । |
| वर्मी | वृणोति इति वर्म । तस्यायं वर्मी । वृञ् वरणे । |
| वरूथिनी | व्रियते स्वयं स्वस्मिन् रमणम् इति वरूथिः । सः अस्मिन् इति वरूथिनी । |
| बिल्मी | बिल्यते भिद्यते अनेन इति बिलम् । सं अस्मिन् अस्ति इति बिल्मी । बिल छेदने । |
| कवचः | कं मनः, वञ्चयति इति कवचः । वञ्चु गतौ । |
| श्रुतः /<br>श्रुतसेनः | वेदादिषु सर्वसम्भाषणेषु अपि श्रूयते इति श्रुतः । श्रु श्रवणे ।<br>बहूनि अङ्गानि सेना इति एकवचनेन उच्यते । एकवचनेन श्रुतसेना इति उच्यते । |

6.1 नमो ज्येष्ठाय च कनिष्ठाय च

- ज्येष्ठः = Elder one.

- कनिष्ठः = Younger one.

6.2 नमः पूर्वजाय चापरजाय च

- पूर्वजः = First-born,
- अपरजः = Last-born.

6.3 नमो मध्यमाय चापगल्भाय च

- मध्यमः = Middle one.
- अपगल्भः = Fetus not yet having Senses developed.

6.4 नमो जघन्याय च बुध्नियाय च

- जघन्यः = Born through back side of the body (animals),
- बुध्नियः = Roots of trees (vegetation).

6.5 नमः सोभ्याय च प्रतिसर्याय च

- सोभ्यः = Being in the world of dualities,
- प्रतिसर्यः = Being in the cycle of life.

Śiva is the eldest and also the youngest, being born first and last. Mahat tattva is the first born. Pañca- bhūtās are the last born. He is also in the middle stage, where senses are not yet developed, i.e., Ahaṅkāra manifestation. Through these 25 tattvās, he is born into the world of dualities, and the cycle of life and death, as both animals and trees. i.e., both movables and immovables. The first fruit of the contact of Prakṛti with the Puruṣa is the Mahat-Tattva. From mahat, Ahaṅkāra. From Ahaṅkāra, Indriyās and Bhutās are born. There are four classes of beings. viz., Jarāyuja, Aṇḍaja, Svedaja and Udbhijja.

1) The Jarāyuja is born of the placenta (viviparous). Human beings, cows, elephants, horses, etc... belong to this class. In this variety the five senses of knowledge exist.
2) The Aṇḍaja is born of eggs (oviparous). Birds, Snakes, etc... are the examples. In this variety, the elements of Vāyu and Ākāśa predominate.
3) Svedajās are born of sweat. Mosquitoes, Bacteria, etc... come under the category. In this variety, Agni and Jala predominate.
4) Trees that are growing up from the seeds are classified under the head Udbhijja. In this variety, Pṛthivī and Jala predominate.

6.6 नमो याम्याय च क्षेम्याय च

- याम्यः = Bestower of Death,
- क्षेम्यः = Bestower of Liberation.

6.7 नम उर्वर्याय च खल्याय च

- उर्वर्यः = Fertile fields, indicates Pṛthivī tattva, the holder of all foods.
- खल्यः = Threshing floors, where grains are separated from plants. Indicates separation of samsara bonds.

6.8 नमः श्लोक्याय चावसान्याय च

- श्लोक्यः = Praised by Vedas.
- अवसान्यः = Described in Vedānta.

6.9 नमो वन्याय च कक्ष्याय च

- वन्यः = Being in trees of forests, This indicates Vanaprastha practices.
- कक्ष्यः = Being creepers or plants in bushes. Indicates secret practices of Yoga.

6.10 नमः श्रवाय च प्रतिश्रवाय च

- श्रवः = Being in Sounds.
- प्रतिश्रवः = Being in Echoes.

These indicate the Nadānusandhāna practices.

6.11 नम आशुषेणाय चाशुरथाय च

- आशुषेणः = One, who has Fast-moving army,
- आशुरथः = One, who has Fast-moving chariot.

The senses are his army, the world is his chariot. The army and chariot can go at any speed, following his will. He is master of both.

6.12 नमः शूराय चावभिन्दते च

- शूरः = Valorous and Powerful to protect Dharma.
- अवभिन्दत् = Violent and Powerful to destroy Adharma.

He is very powerful to lead Citta into Ekāgra state. He is very violent to destroy the Citta Vikṣepās from the root-level.

6.13 नमो वर्मिणे च वरूथिने च

- वर्मिन् = Who is wearing the Safety jacket,
- वरूथी = Who is in a well-protected Chariot.

6.14 नमो बिल्मिने च कवचिने च

- बिल्मिन् = Who is Wearing a helmet,
- कवचिन् = Who is covered in the armor.

He is wearing the helmet, armors, safety jackets and a protective chariot. i.e., Being highly alert and prepared to fight with the enemies. He is highly alert not to be attacked by the enemies. The enemies are Kāma, Krodha, Lobha, Moha, Mada and Mātsarya.

6.15 नमः श्रुताय च श्रुतसेनाय च ॥

- श्रुतः = Who is Glorified in Vedas,
- श्रुतसेनः = Who has famous army in winning the battles.

He is always victorious in destroying the Adharma. So, his stories are glorified in the Vedas. His army, the gods of the senses and pañca-bhūtās are also glorified in Vedas in winning these battles.

## 3.7 सप्तमानुवाकः

7.1 नमो॑ दुन्दु॒भ्या॑य चाहन॒न्या॑य च॒

7.2 नमो॑ धृ॒ष्णवे॑ च प्रमृ॒शाय॑ च॒

7.3 नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च॒

7.4 नमो॑ निष॒ङ्गिणे॑ चेषुधि॒मते॑ च॒

7.5 नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च॒

7.6 नमः॑ स्वायु॒धाय॑ च सु॒धन्व॑ने च॒

7.7 नम॒ः स्रुत्या॑य च॒ पथ्या॑य च॒

7.8 नमः॑ का॒ट्या॑य च नी॒प्या॑य च॒

7.9 नम॒ः सूद्या॑य च सर॒स्या॑य च॒

7.10 नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒

7.11 नम॒ः कूप्या॑य चाव॒ट्या॑य च॒

7.12 नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒

7.13 नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒

7.14 नम॑ ई॒ध्रिया॑य चात॒प्या॑य च॒

7.15 नमो॒ वात्या॑य च॒ रेष्मि॑याय च॒

7.16 नमो॑ वास्त॒व्या॑य च वास्तु॒पाय॑ च ॥ 7॥

| | |
|---|---|
| दुन्दुभ्यः | दुनु शब्दवत् भाति इति दुन्दुभ्यः । भा दीप्तौ । |
| आहनन्यः | आहन्यते अनेन इति आहनन्यः । हन हिंसागत्योः । |
| धृष्णुः | धृष्णोति दृढी भवति इति धृष्णुः । ञि धृषा प्रागल्भ्ये । |
| प्रमृशः | प्रमाणेन विमृशति विचारयति इति प्रमृशः । मृश आमर्शने । |
| दूतः | दूयते अनेन इति दूतः । द्रुङ् परितापे । |
| प्रहितः | प्रकर्षेण हिनोति गच्छति वर्धते च इति प्रहितः । हि गतौ वृद्धौ च । |
| निषङ्गी | सज्यन्ते इति निषङ्गः । सः अस्य अस्ति इति निषङ्गी । षञ्ज सङ्गे । |
| इषुधिमत् | इष्यति गच्छन्ति इति इषवः । इष गतौ । तान् धीयते अत्र इति इषुधिः । |

| | |
|---|---|
| | ते अस्मिन् सन्ति इति इषुधिमत् । डु धाञ् धारणपोषणयोः । |
| तीक्ष्णेषुः | तीक्ष्णेन इष्यति इति तीक्ष्णेषुः । सः अस्मिन् अस्ति इति तीक्ष्णेषुः । इष गतौ । |
| आयुधी | आ स्मृतौ, युध्यते अनेन इति आयुधम् । तत् अस्मिन् अस्ति इति आयुधी । युद्ध सम्प्रहारे । |
| स्वायुधः | स्वरूपमेव आयुधः यस्यः सः स्वायुधः । |
| सुधन्वा | सुष्ठु धनति प्रार्थयते इति सुधनुः । सः अस्मिन् अस्ति इति सुधन्वा । धन प्रार्थनायाम् । |
| स्रुत्यः | स्रूयते अनेन इति स्रुतिः । तस्यां भवः स्रुत्यः । स्रु स्रवणे । |
| पथ्यः | निरामये पथि साधु पथ्यः । |
| काट्यः | कटति इति काटः । तत्र भवः काट्यः । कटी गतौ । |
| नीप्यः | नयति इति नीपः । तत्र भवः नीप्यः । णीञ् प्रापणे । |
| सूद्यः | सूदयति क्षारयति इति सूदः । तस्मै योग्यः सूद्यः । षूद क्षरणे । |
| सरस्यः | सरति प्रवहति तस्मिन् इति सरः । तस्मै योग्यः सरस्यः । सृ गतौ । |
| नाद्यः | नदितुम् अव्यक्तेन शब्दयितं योग्यः नाद्यः । णद अव्यक्ते शब्दे । |
| वैशन्तः | वेष्टुं योग्यः वैशन्तः । विश प्रवेशने । |
| कूप्यः | कुत्सितासु अप्सु अस्ति इति कूप्यः । |
| अवट्यः | अव अधोमुखे, अटति गच्छति इति अवटः । तेषु अस्ति इति अवट्यः । अट गतौ । |
| वर्ष्यः | वर्षितुं सिञ्चितुं योग्यः वर्ष्यः । वृषु सेचने । |
| अवर्ष्यः | वर्षितुं सिञ्चितुं प्रवृत्तिः अस्मिन् अस्ति इति अवर्ष्यः । वृषु सेचने । |
| मेघ्यः | मेढुं सिञ्चितुं योग्यः मेघ्यः । मिह सेचने । |
| विद्युत्यः | विदा ज्ञानेन यौति इति विद्युत् । सा रूपः भूत्वा वर्तते इति विद्युत्यः । यु मिश्रणे । |
| ईध्रियः | इन्धे इति ईध्रम् । तत्र भवः ईध्रियः । इन्धी दीप्तौ । |
| आतप्यः | आ स्मृतौ, तापयितुं योग्यः आतप्यः । तप सन्तापे । |
| वात्यः | वातुं योग्यग् वात्यः । वा गतिगन्धनयोः । |
| रेष्मियः | रिष्यन्ति इति रेष्मम् । तल्लक्षणः रेष्मियः । रिष हिंसायाम् । |
| वास्तव्यः | वसितुं योग्यः वास्तव्यः । वस निवासे । |
| वास्तुपः | वसन्ति अस्मिन् इति वास्तुः । तं पाति इति वास्तुपः । वस निवासे । |

7.1 नमो दुन्दुभ्याय चाहनन्याय च

- दुन्दुभ्यः = who is present in kettle-drum,
- आहनन्यः = who is present in the stick used for beating the drum.

7.2 नमो धृष्णवे च प्रमृशाय च

- धृष्णुः = who is very courageous in battles,
- प्रमृशः = who knows the intricacies of the opposing army.

7.3 नमो दूताय च प्रहिताय च

- दूतः = A messenger/ambassador.
- प्रहितः = Agent/Commissioner, sent by his master for fulfilling a task.

7.4 नमो निषङ्गिणे चेषुधिमते च

- निषङ्गिण् = The holder of sword,
- इषुधिमत् = The holder of quiver of arrows.

7.5 नमस्तीक्ष्णेषवे चायुधिने च

- तीक्ष्णेषुः = The holder of sharp arrows,
- आयुधिन् = The holder of many weapons.

7.6 नमस्स्वायुधाय च सुधन्वने च

- सु+आयुधः = The holder of superior weapons,
- सुधन्वन् = The holder of superior bow.

His Omni-presence is explained. He is the courageous warrior, knowing the strategies of enemies very well, holding the best of all weapons like arrows, swords, bows etc. Not only the warriors, but also the messengers and agents serving the King, and even the drums beaten in the war, and the beating sticks are also filled with Śiva-consciousness. There is a story from Mahābhārata. Arjuna is firing the arrows and weapons. He sees there is one person holding a Triśūla and killing the enemies, even before his arrows are hitting them. Everyone is praising Arjuna, saying that He is victorious having killed the enemies. But Arjuna has never seen any of his arrows killing the enemies. His arrows are always falling on the already dead enemy. So, he asked the same question to Vyāsa maharṣi to tell about that killing identity. So, Vyāsa maharṣi explains that - He is none

other than Mahādeva (Rudra), who is killing them when their time comes, and your arrows are just instrumental. Then, Vyāsa maharṣi explains the glories of Mahādeva in 40 ślokās, that gives the summary of these Namaka-mantras.

### 7.7 नमः स्रुत्याय च पथ्याय च

- स्रुत्यः = Of Narrow-paths (fit for only one person to walk),
- पथ्यः = Main-paths (Highways, where Chariots can travel).

These indicate the different paths of Yoga-Sādhana, including both individual and universal practices. There is a story in Rāmāyaṇa - When the god Yama comes to Rama's palace to take back Rāma to Vaikunṭha - Rāma puts a condition-- "Not only myself, but entire Ayodhya followed my principles of Dharma. They are all detached from their Karma, being submissive to me. So, all of them should also get Mokṣa." So, Rāma followed the individual practices as well as lead the entire Ayodhya to follow the group practices of Karma-yoga, and attain the abode of Kaivalya.

### 7.8 नमः काट्याय च नीप्याय च

- काट्यः = Of Small channels of water,
- नीप्यः = Of large streams of water,

### 7.9 नमः सूद्याय च सरस्याय च

- सूद्यः = Of marshy/muddy places and
- सरस्यः = Of lakes.

### 7.10 नमो नाद्याय च वैशन्ताय च

- नाद्यः = Of rivers,
- वैशन्तः = Of small-ponds

### 7.11 नमः कूप्याय चावट्याय च

- कूप्यः = Of wells and
- अवट्यः = Of ditches / water-pits.

Different types of flows of water indicate the flow of Ādhyātma Saṁskārās in that mode.

7.12 नमो वर्ष्याय चावर्ष्याय च

- वर्ष्यः = Who is related to rains,
- अवर्ष्यः = Who is not related to rains.

7.13 नमो मेघ्याय च विद्युत्याय च

- मेघ्यः = Of clouds.
- विद्युत्यः = Of Lightnings

7.14 नम ईध्रियाय चातप्याय च

- ईध्रियः = Being in Shining clouds (of clear Sky),
- आतप्यः = Being in Sun's heat,

7.15 नमो वात्याय च रेष्मियाय च

- वात्यः = Of winds,
- रेष्मियः = Of storms (cyclone winds),

7.16 नमो वास्तव्याय च वास्तुपाय च ॥

- वास्तव्यः = Of residential animals like cows, horses etc.
- वास्तुपः = The protector of such residential sites.

Omnipresence of Śiva-consciousness is described in being Rains, and also in the absence of rains. Clouds, Lightnings, Sunny-clouds, Sun's heat, Winds and Storms, All living beings at home and the protector of those homes.

## 3.8 अष्टमानुवाकः

8.1 नम॒ः सोमा॑य च रु॒द्राय॑ च॒
8.2 नम॑स्ता॒म्राय॑ चारु॒णाय॑ च॒
8.3 नम॑ः श॒ङ्गाय॑ च पशु॒पत॑ये च॒
8.4 नम॑ उ॒ग्राय॑ च भी॒माय॑ च॒
8.5 नमो॑ अग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒
8.6 नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒
8.7 नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒
8.8 नम॑स्ता॒राय॒
8.9 नम॑श्श॒ंभवे॑ च मयो॒भवे॑ च॒
8.10 नम॑ः शंक॒राय॑ च मयस्क॒राय॑ च॒
8.11 नम॑ः शि॒वाय॑ च शि॒वत॑राय च॒
8.12 नम॒स्तीर्थ्या॑य च॒ कूल्या॑य च॒
8.13 नम॑ः पा॒र्या॑य चावा॒र्या॑य च॒
8.14 नम॑ः प्र॒तर॑णाय चो॒त्तर॑णाय च॒
8.15 नम॑ आता॒र्या॑य चाला॒द्या॑य च॒
8.16 नम॒ः शष्प्या॑य च॒ फेन्या॑य च॒
8.17 नम॑ः सिक॒त्या॑य च प्रवा॒ह्या॑य च ॥ 8॥

| | |
|---|---|
| सोमः | सूते इति सोमः । षूञ् प्राणिप्रसवे । |
| ताम्रः | ताम्यते इति ताम्रः । तमु काङ्क्षायाम् । |
| अरुणः | इयर्ति अरुणः । ऋ गतौ । |
| शङ्गः | शं शाश्वतसुखं, गमयति इति शङ्गः । गमॢ गतौ । |
| उग्रः | उ इत्यनेन सम्बोधन-कोप-आज्ञ-अङ्गीकार-आश्चर्यकादि जगत्, गीर्यते अनेन इति उग्रः । गॄ निगरणे । |
| भीमः | भिभेति अस्मात् सर्वं जगत् इति भीमः । ञिभी भये । |

| | |
|---|---|
| अग्रेवधः | अग्रे भवं शत्रुम् (अर्थात् अन्तश्शत्रुम्) हन्ति इति अग्रेवधः । हन हिंसागत्योः । |
| दूरेवधः | दूरे भवं शत्रुम् (अर्थात् बाह्यशत्रुम्) हन्ति इति दूरेवधः । हन हिंसागत्योः । |
| हन्ता, हनीयः | अनात्मभावान् हन्ति इति हन्ता । अतिशयेन हन्ति हनीयः । हन हिसागत्योः । |
| तारः | तारयति इति तारः । तॄ प्लवन तरणयोः । |
| शम्भुः | शं सुखं, यस्मात् भवति इति शम्भुः । |
| मयोभवः | मयः = तदेव अथवा तस्य विकारः इति, अनेन सर्वं भवति इति मयोभवः । |
| शङ्करः | शं मोक्षसुखं करोति इति शङ्करः । डु कृञ् करणे । |
| मयस्करः | मयः = तदेव अथवा तस्य विकारः इति, अनेन सर्वं क्रियते इति मयस्करः । डु कृञ् करणे । |
| शिवः, शिवतरः | शमयति शिवः । अतिशयेन शमयति इति शिवतरः । शमु उपशमे । |
| तीर्थ्यः | तरन्ति इति तीर्थः । तॄ प्लवनतरणयोः । |
| कूल्यम् | कोलति संस्त्यायति इति कूल्यम् । कुल संस्त्याने । |
| पार्यः | पारयितुं योग्यम् अनेन इति पार्यः । |
| अवार्यः | अनेन अस्तित्वात् न विद्यते वाः अन्यस्य ग्राह्यम् इति अवार्यः । विद सत्तायाम् । |
| प्रतरणः | प्रकर्षेण तरति अनेन इति प्रतरणः । तॄ प्लवन तरणयोः । |
| उत्तरणः | उत् तरन्ति अनेन उत्तरणः । |
| आतारः, आतार्यः | संसारतीरं प्राप्यापि कर्मशेषेण पुनरावर्तनम् आतारः । आत सातत्यगमने ।<br>आ स्मृतौ समन्तात् च संसारात् तरितुं तारयितुं च योग्यः आतार्यः । तॄ प्लवन तरणयोः । |
| आलादः, आलाद्यः | भूयो भूयः संसारमार्गे आवर्तरूपेण परिभ्रमणम् आलादः ।<br>आ स्मृतौ समन्तात् च संसारात् तरितुं योग्यं लाति गृह्णाति इति आलाद्यः । ला आदाने । |
| शष्प्यः | शशितुं योग्यः शष्प्यः । शशु हिंसायाम् । |
| फेन्यः | स्फायितुं योग्यः फेन्यः । स्फायी वृद्धौ । |
| सिकत्यः | सिञ्चितुं योग्यः सिकत्यः । षिच क्षरणे । |
| प्रवाह्यः | प्रवहितुं योग्यः प्रवाह्यः । वह प्रापणे । |

8.1 नमः सोमाय च रुद्राय च

- सोमः = स+उ+म्+अ = Who is with Umā-devi (Pārvatī). This also indicates him, as PRAṆAVA, combination of the 3 primal letters अ+उ+म्. Other meaning is Soma = Moon, the cause of nectar.
- रुद्रः = Rudra, the remover of Tri-duḥkhās.

8.2 नमस्ताम्राय चारुणाय च

- ताम्रः = Copper-red color of Sun at dawn.
- अरुणः = Little-red color of Sun just after dawn.

Tāmra indicates the Desire for Mokṣa. Aruṇa indicates the sādhana towards that.

8.3 नमः शङ्गाय च पशुपतये च

- शङ्गः = Who Leads the devotee towards Bliss,
- पशुपतिः = The Protector of all beings.

8.4 नम उग्राय च भीमाय च

- उग्रः = Terrific.
- भीमः = Fearful.

All the gods perform their duties properly in the fear of his terrible form.

8.5 नमो अग्रेवधाय च दूरेवधाय च

- अग्रेवधः = Slaying the nearby enemies,
- दूरेवधः = Slaying the distant enemies.

Prārabdha Saṁskārās are nearby enemies, which are infront of us. Āgāmi saṁskāras are distant enemies. Śiva-consciousness removes them both.

8.6 नमो हन्त्रे च हनीयसे च

- हन्तृ = Being Destructive,
- हनीयस् = Being Very much destructive.

He removes all the Citta-Vṛttīs. He destroys even the seeds of those Pratyayās. So, he bestows both Samprajñāta and Asamprajñāta Samādhi states.

8.7 नमो वृक्षेभ्यो हरिकेशेभ्यो

- वृक्षाः = Trees,
- हरिकेशाः = Green-leaves.

As said in Bhagavadgīta, that eternal Aśvattha tree has its roots above, and branches spreading down. Vedas are its leaves.

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥15.1॥

i.e., Mūla-Prakṛti is the seed of Triguṇās. It has manifested into a Tree, having Ahaṅkāra as the trunk, and branches as Bhutās and Indriyās. Leaves are the Vedas.

8.8 नमस्ताराय

- तारः = ॐ = Praṇava = Tāraka-mantra, that helps to cross over the Saṁsāra ocean.

8.9 नमः शम्भवे च मयोभवे च

- शम् = Material happiness. मयस् = Eternal bliss.
- शम् + भू = शम्भुः = Cause of worldly happiness,
- मयस् + भू = मयोभुः = Cause of eternal bliss.
- भू = is, exists (=भवति). Because of whom, शम् / मयस् exists.

8.10 नमः शङ्कराय च मयस्कराय च

- शम् + करः = शङ्करः = Bestower of worldly happiness,
- मयस् + करः = मयस्करः = Bestower of eternal bliss.
- कृ = Doing (=करोति). Who does / gives the शम् / मयस् .

8.11 नमः शिवाय च शिवतराय च

- शिवः = Auspicious, Tranquility.
- शिवतरः = Extremely auspicious.

शिव indicates मनः प्रशमन state. This is the state of Yoga / Samādhi. शिवतरः indicates the Highest state of Yoga / Samādhi, i.e., Nirbīja Samādhi. The Pañcākṣarī mantra "नमः शिवाय" is revealed in this Anuvāka.

8.12 नमस्तीर्थ्याय च कूल्याय च

- तीर्थ्यः = Residing in holy waters like Gaṅgā,
- कूल्यः = Residing on the river shores.

Śiva-consciousness being present in both waters and the shores. River indicates the Saṁsāra. Shore indicates the state of Citta.

8.13 नमः पार्याय चावार्याय च

- पार्यः = Residing on the opposite bank of river,
- आवार्यः = Residing on this bank of river.

Our current state of Citta indicates this bank. Samādhi state of Citta indicate the other bank.

8.14 नमः प्रतरणाय चोत्तरणाय च

- प्रतरणः = Enabling to cross-over the rivers,
- उत्तरणः = Uplifting from being sunken into rivers.

Śiva-consciousness helps to cross over this Saṁsāra, and it also uplifts the sunken Citta from Moha or Duḥkha.

8.15 नम आतार्याय चालाद्याय च

- आतार्यः = Who is Returning back after crossing the river,
- आलाद्यः = Who is whirling again and again in the river.

Returning back after crossing = Descending as incarnation from the state of Samādhi, to establish Dharma. Whirling again and again = Looping in the Birth and Death cycle.

8.16 नमः शष्प्याय च फेन्याय च

- शष्प्यः = Residing in the Tender-grass (Kuśa grass) on the riverbeds,
- फेन्यः = Residing in the foam of water waves.

Kuśa-grass indicates the protection from Diseases i.e., Citta-Vikṣepās. Foam indicates the waves of ecstasy in the state of Samādhi.

8.17 नमः सिकत्याय च प्रवाह्याय च ॥

- सिकत्यः = Residing in the Sands and
- प्रवाह्यः = Residing in the flows.

Sand indicates the sprinkling of Samādhi state bliss. Flow indicates the continuous flow of that bliss. These indicate Dhāraṇa and Dhyāna states of Samādhi respectively.

## 3.9 नवमानुवाकः

9.1 नम॑ इरि॒ण्या॑य च प्रप॒थ्या॑य च॒

9.2 नमः॑ किग्ँ शि॒लाय च॒ क्षय॑णाय च॒

9.3 नमः॑ कप॒र्दिने॑ च पुल॒स्तये॑ च॒

9.4 नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒

9.5 नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒

9.6 नमः॑ का॒ट्या॑य च गह्व॒रे॒ष्ठाय॑ च॒

9.7 नमो॑ ह्रद॒य्या॑य च निवे॒ष्प्या॑य च॒

9.8 नमः॑ पाग्ँ स॒व्या॑य च रज॒स्या॑य च॒

9.9 नम॒ः शुष्क्या॑य च हरि॒त्या॑य च॒

9.10 नमो॒ लोप्या॑य चोल॒प्या॑य च॒

9.11 नम॑ ऊ॒र्व्या॑य च सू॒र्म्या॑य च॒

9.12 नमः॑ प॒र्ण्या॑य च पर्णश॒द्या॑य च॒

9.13 नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒

9.14 नम॑ आख्खिद॒ते च॑ प्रख्खिद॒ते च॒

9.15 नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ग्ँ हृद॑येभ्यो॒

9.16 नमो॑ विक्षीण॒केभ्यो॒

9.17 नमो॑ विचिन्व॒त्केभ्यो॒

9.18 नम॑ आनिर्ह॒तेभ्यो॒

9.19 नम॑ आमीव॒त्केभ्यः॑ ॥ 9॥

| | |
|---|---|
| इरिण्यः | इयर्ति गच्छति इति इरिणः । ऋ गतौ । |
| प्रपथ्यः | प्रकर्षेण सर्वजनैः बहुविधैः पन्थयितुं योग्यः प्रपथ्यः । पथि गतौ । |
| किंशिलः | किमपि सर्वैः शाल्यते श्लाघ्यते इति किंशिलः । शाल श्लाघायाम् । |
| क्षयणः | क्षेतुं निवसितुं गन्तुं च योग्यः क्षयणः । क्षि निवासगत्योः । |
| कपर्दी | केन जलेन पूर्तिं ददाति इति कपर्दः । कपर्दो अस्य अस्ति इति कपर्दी । पर्व पूरणे । |

| | |
|---|---|
| पुलस्तिः | पोलितुं योग्यः पुलस्तिः । पुल महत्वे । |
| गोष्ठ्यः | गच्छति गम्यते इति गौः । सा स्थातुं योग्यः गोष्ठ्यः । गमॢ गतौ । |
| गृह्यः | ग्रहीतुं योग्यः इति गृह्यः । ग्रह उपादाने । |
| तल्प्यः | तालयितुं पूरितुं योग्यः तल्प्यः । तल प्रतिष्ठायाम् । |
| गेह्यः | ग्रहीतुं योग्यः गेह्यः । ग्रह उपादाने । |
| काट्यः | कटितुं योग्यः काट्यः । कत गतौ । |
| गह्वरः / गह्वरेष्ठः | गतिं ह्वरति इति गह्वरः। ह्वृ कौटिल्ये । गह्वरे तिष्ठति इति गह्वरेष्ठः । ष्ठा गतिनिवृत्तौ । |
| ह्रदयः | ह्रादितुं योग्यः ह्रदय्यः । ह्राद अव्यक्ते शब्दे । |
| निवेष्प्यः | नितरां वेवेष्टि इति निवेष्पम् । तत्र भवः निवेष्प्यः । विषॢ व्याप्तौ । |
| पांसव्यः | पंसयितुं नाशयितुं योग्यः पांसवः । तत्र भवः पांसव्यः । पसि नाशने । णश अदर्शने । |
| रजस्यः | रञ्जयुतुं योग्यः रजः । तत्र भवः रजस्यः । |
| शुष्क्यः | शुष्यन्ते अनेन इति शुष्क्यः । शोषितुं योग्यः शुष्क्यः । शुष्यन्ते अस्मिन् इति शुष्क्यः । शुष शोषणे । |
| हरित्यः | हर्तुं योग्यः हरः । हरः अस्य सञ्जातः इति हरितः । तत्र भवः हरित्यः । हृञ् हरणे । |
| लोप्यः | लोप्तुं योग्यः लोप्यः । लुपॢ छेदने । |
| उलप्यः | उ इत्यनेन सम्बोधन-कोप-आज्ञ-अङ्गीकार-आश्चर्यकादि भावेषु लपितुं योग्यः उलप्यः । |
| ऊर्व्यः | ऊर्वितुं योग्यः ऊर्व्यः । ऊर्णुञ् आच्छादने । |
| सूर्म्यः | सुष्ठु प्राणिनां स्वस्य भावे अर्पयितुं योग्यः सूर्म्यः । |
| पर्ण्यः | परितुं परीतुं पारयितुं च योग्यः पर्ण्यः । पृ पालनपूरणयोः । |
| पर्णशद्यः | पारायमाणान् शत्तुं जरीतुं क्षेप्तुं वा योग्यःपर्णशद्यः । पृ पालनपूरणयोः। शद्लृ शातने । जॄष वयोहानौ । क्षिप प्रेरणे । |
| अपगुरमाणः | अप प्रतिपक्षे गुरते इति अपगुरमाणः । गुरी उद्यमने । |
| अभिघ्नत् | अभिमुखतः भूत्वा हन्ति इति अभिघ्नत् । हन हिंसायाम् । |
| आख्खिदत् | आ = समन्तात् स्मृतौ च, खिद्यति इति आख्खिदत् । खिद दैन्ये । |
| प्रख्खिदत् | प्रकर्षेण खिद्यति इति प्रख्खिदत् । खिद दैन्ये । |

9.1 नम इरिण्याय च प्रपथ्याय च

- इरिण्यः = Being in the Deserted paths (people rarely use this),
- प्रपथ्यः = Being in Trodden paths (Many People walked in this).

9.2 नमः किँशिलाय च क्षयणाय च

- किँशिलः = Being in Gravelly places (full of small stones),
- क्षयणः = Being in Habitable places (suitable for living).

9.3 नमः कपर्दिने च पुलस्तये च

- कपर्दिन् = Being with Matted-locks,
- पुलस्तिः = Being with Soft and Silky hair.

9.4 नमो गोष्ठ्याय च गृह्याय च

- गोष्ठ्यः = Being in the Cow-sheds,
- गृह्यः = Being in the Houses,

9.5 नमस्तल्प्याय च गेह्याय च

- तल्प्यः = Being in couches (cot/sofa),
- गेह्यः = Being in mansions,

9.6 नमः काट्याय च गह्वरेष्ठाय च

- काट्यः = Being in the Thorny shrubs / forests,
- गह्वरेष्ठः = Being in the inaccessible caves.

9.7 नमो ह्रदय्याय च निवेष्प्याय च

- ह्रदय्यः = Being in Deeper lakes,
- निवेष्प्यः = Being in Snow waters.

Various practices of Yoga - either isolated or popular practices, being either in villages or hilly regions, either in Cow-sheds or Houses or Couches or mansions, either in Deep forests or caves or lakes or Snows; either being a Sannyāsī or Saṃsārī - Śiva consciousness is omnipresent and blesses everyone.

9.8 नमः पाँसव्याय च रजस्याय च

- पाँसव्यः = Being in the invisible Subtle dust particles.
- रजस्यः = Being in the visible Gross dust particles.

These indicate the Rājasic/Tāmasic karmas, fulfilling the Worldly desires.

9.9 नमः शुष्क्याय च हरित्याय च

- शुष्क्यः = Being in Dried trees - Indicates Smaśānās.
- हरित्यः = Being in Green trees - Indicates forests/gardens.

9.10 नमो लोप्याय चोलप्याय च

- लोप्यः = Being in hard/barren soils - Indicates infertility.
- उलप्यः = Being in tiny grasses - Indicates fertility.

9.11 नम ऊर्व्याय च सूर्म्याय च

- ऊर्व्यः = Being in earth/soils – Indicates Dhyāna Yoga, steady practices.
- सूर्म्यः = Being in beautiful wavy waters – Indicates Gandharva Yoga, rhythmic practices.

9.12 नमः पर्ण्याय च पर्णशद्याय च

- पर्ण्यः = Being in green leaves - Indicates Saṁsāra,
- पर्णशद्यः = Being in heaps of dried leaves - Indicates Sannyāsa.

Śiva-consciousness is omnipresent in both invisible/visible dust particles, dried/green trees, hard/soft soils, lands/waters, green/dried leaves, etc.

9.13 नमोऽपगुरमाणाय चाभिघ्नते च

- अपगुरमाणः = Who is wielding the weapons,
- अभिघ्नत् = Who is beating them.

9.14 नम आख्खिदते च प्रख्खिदते च

- आख्खिदत् = Who is causing little Affliction,
- प्रख्खिदत् = Who is causing severe Affliction.

He is wielding his weapons to afflict the enemies little or severely. i.e., to minimize the Kleśās or completely destroy them. अपगुरमाण --> अभिघ्नत् --> आख्खिदत् --> प्रख्खिदत् are the four steps of removing the Kleśās.

| | |
|---|---|
| किरिकः | किरति इति किरिकः । कॄ विक्षेपः । |
| देवानां हृदयम् | दीव्यति इति देवः । दिवु द्युतौ ।<br>हरति विषयमलिनं शुद्ध्यर्थम् इति हृदयम् । |
| विक्षीणकः | विशिष्टेण क्षिण्वन्ति इति विक्षीणकः । क्षिनु हिंसायाम् । |
| विचिन्वत्कः | विशेष्टेण चिनोति इति विचिन्वत्कः । चिञ् चयने । |
| आनिर्हतः | पापं हन्यते, आ स्मृतौ निर्गम्यते अनेन इति आनिर्हतः । हन हिंसायाम् । |
| आमीवत्कः | आ समन्तात् स्मृतौ च मीवति इति आमीवत्कः । मीव स्थैल्ये । |

9.15 नमो वः किरिकेभ्यो देवानाँ हृदयेभ्यो

- देवानाँ हृदयाः = The hearts of devas.
- किरिकाः = Being Scattered.

These are the various groups of Rudra. Heart indicates the seat of Consciousness. From the heart region, 101 nerves are scattered all around the body. Among them, 100 nerves cause bondage and the remaining one - Suṣumna nāḍī causes liberation. Rudra is the Kriya-Śakti of Prāṇa, scattered in these 101 nerves, further scattered into 72000 Nāḍīs and further infinitely.

9.16 नमो विक्षीणकेभ्यो

- विक्षीणकाः = Being Undestroyable (in the hearts of devās),

The Prāṇa is undestroyable. Even after the death, the Prāṇa named Dhanañjaya doesn't leave the body.

9.17 नमो विचिन्वत्केभ्यो

- विचिन्वत्काः = Ability to Discriminate Good or Bad (in the hearts of devās),

Wherever Manas desires, Prāṇa flows there. So, Rudra is the Icchā-Śakti of Manas.

9.18 नम आनिर्हतेभ्यो

- आनिर्हताः = Completely destroying the Bondage (in the hearts of devās),

Knowledge destroys the bond of Ignorance. So, Rudra is in the Jñāna Śakti of Buddhi. Buddhi, reflecting the true nature of the Self, destroys all the bonds.

9.19 नम आमीवत्केभ्यः

- आमीवत्काः = Being in the gross/expanded form (in the hearts of devās).

Rudra is the Super-consciousness, "Cit", the source of Kriya / Icchā / Jñāna Śaktis.

## 3.10 दशमानुवाकः

10.1 द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒न्नील॑लोहित ।
एषां पुरु॑षाणामे॒षां प॑शू॒नां मा भेर्माऽरो॒ मो ए॑षां॒ किंच॒नाम॑मत् ॥

द्रापे अन्धसःपते दरिद्रन् नीललोहित ।
एषां पुरुषाणाम् एषां पशूनां मा भेः मा+आरो मा+उ एषां किञ्चन+आममत् ॥ 10-1॥

| | |
|---|---|
| द्रापे | लौकिकमतीनां द्रापयति कुत्सितगतिं गमयति इति द्रापिः । द्रा कुत्सायां गतौ । |
| अन्धसः+पते | अद्यते इति अन्धः । अद भक्षणे । तस्य आध्यात्मिकतत्त्वं पाति इति अन्धसस्पतिः । पा रक्षणे । |
| दरिद्रत् | प्राणिनां लौकिकदृष्टिं दरिद्रायते इति दरिद्रत् । दरिद्रा दुर्गतौ । |
| नीललोहित | नितराम् ईड्यते नीलः । ईड स्तुतौ । लुह्यते इति लोहितः । लुह कत्थनादौ ।<br>नीलः च असौ लोहितः च नीललोहितः । |
| एषां | (पुं, इदम्, ष.वि., ब.व.) |
| पुरुषाणाम् | पुरि शरीरे शेते इति पुरुषः । शीङ् स्वप्ने । |
| पशूनाम् | पश्यते इति पशुः । |
| मा भेः | मा बिभीषथाः = मा हिंसीः । ञिभी भये । |
| मा अरः | अर्यते इति अरः । ऋ गतिप्रापणयोः । |
| एषां किञ्चन<br>मा+उ<br>आममत् | एषां किमपि आमं मा अकार्षीत् । अम रोगे । |

- द्रापे = Causing enemies to run away,
- अन्धसः+पते = The Protector of food,
- दरिद्रत् = Not having anything himself.
- नीललोहित = Being darkish (due to poison in the throat) and reddish hue,
- एषां पुरुषाणां = To these people,

- एषां पशूनां = To these animals,
- मा भेः = Do not cause fear.
- मा अरः = Shall not be perished.
- एषां किञ्चन = Even the smallest of these,
- मा उ आममत् = Shall not have disease.

Rudra/Śiva causes our enemies to run away, and is protecting our food. But he has no attachment to one small grain of food also. His appearance is mixed with Dark and Red colors, indicating Tamas and Rajo guṇās. This is his outer covering, of his Pure Sattvic inner quality reflecting the light of Brahman. So, we are praying that all our people and cattle be freed from fear, diseases and last forever, having filled with pure Sattva guṇa.

10.2 या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाह॑ भेषजी ।
शि॒वा रु॒द्रस्य॑ भेषु॒जी तया॑ नो मृड जी॒वसे॑ ॥

या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी ।
शिवा रुद्रस्य भेषजी तया नः मृड जीवसे ॥ 10-2॥

| | |
|---|---|
| या | (स्त्री, यद् , प्र.वि., ए.व.) |
| ते | (युष्मद्, ष.वि., ए.व.) |
| रुद्र | रुत्या वेदरूपेण आध्यात्मिकतेजो भूत्वा रोदयति द्वैतभावान् इति रुद्रः । रुदिर् अश्रुविमोचने । |
| शिवा | शमयति इति शिवा । शमु उपशमे । |
| तनूः | तनोति विस्तरति इति तनूः । तनु विस्तारे । |
| विश्वाह भेषजी शिवा | विशति सर्वम् आध्यात्मिकरूपेण इति विश्वः । विश प्रवेशने ।<br>विश्वस्मिन् सर्वस्मिन् न जहाति आध्यात्मिक आगमनम् आध्यात्मिक ज्ञानम् इति विश्वाह । ओहाक् त्यागे ।<br>भिषज्यति चिकित्सति साधकस्य सर्वाः व्यवस्थाः इति भेषजी । भिषङ् चिकित्सायाम् ।<br>विश्वाहा च असौ भेषजी च विश्वाहभेषजी । |

| | |
|---|---|
| तया | (स्त्री, यद्, तृ.वि., ए.व.) |
| रुद्रस्य भेषजी शिवा | रुजं संसाराख्यं रोगं द्रावयति इति रुद्रः । तस्य रुद्रस्य भेषजी । |
| नः जीवसे मृड | नः = अस्मान् (अस्मद्, द्वि.वि., ब.व.) । जीवसे = जीवितुम् । मृड = सुखय । मृड सुखने । |

- रुद्र! = O Rudra!
- या ते तनूः शिवा = That, which form of yours, is Śiva,
- विश्वाह भेषजी शिवा = The Universal medicine, being Śiva,
- रुद्रस्य भेषजी शिवा = The medicine of Rudra, being Śiva,
- तया नः जीवसे मृड = With that, make our life Blissful.

Three forms of Śiva is described here:

1) Śiva is the Result of Healthy state.
2) Śiva is the Universal-Medicine, i.e., One medicine for all diseases.
3) Śiva himself is the Doctor giving medicine.

Doctor → Medicine → Health. All three are Śiva. Śiva is not like normal medicines, where separate medicine is required for each disease. He is the Universal medicine (विश्वाह भेषजी) -- i.e., One medicine for all diseases. Medicine indicates the removal disease. Health indicates the absence of disease, i.e., Blissful state. Not only diseases, but all Citta Vikṣepās like Vyādhi, Styāna, Saṃśaya, …etc. When these Vikṣepās are absent, it results into Blissful state, Samādhi. This is the state of Śiva. Śiva himself is the tool to achieve this state. Śiva himself is the bestower of this state (in the form of Rudra).

10.3 इमाग्ँ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् ।
यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥

इमां रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् ।
यथा नः शम् असत् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन् अनातुरम् ॥ 10-3॥

| | |
|---|---|
| इमां | (स्त्री, इदम्, द्वि.वि., ए.व.) |
| रुद्राय | रुद्रः, तस्मै । |
| तवसे | बलयुक्ताय । अस्मात् अपेक्षितं आध्यात्मिकं कर्तुं समर्थाय तपोबलं, तद्वते तवसे । तु गतिवृद्धिहिंसासु । |
| कपर्दिने | कायते ज्ञानेन व्यक्तीकरोति इति कः । कै शब्दे । तस्मिन् परं पूर्तिं ददाति इति कपर्दः । डु दाञ् दाने । कपर्दो अस्य अस्ति इति कपर्दी । |
| क्षयद्वीराय | क्षियन्ति निवसन्ति वीराः यं प्राप्य / आश्रित्य सः क्षयद्वीरः । क्षी निवासे । |
| प्रभरामहे | प्र+भृञ् भरणे । (वर्तमाने लट्, उ.पु., ब.व.) |
| मतिम् | मन्यते अनया इति मतिः । मन ज्ञाने । |
| शम् | सुखम् । शमु उपशमे । |
| असत् | असत् = स्यात् । अस भुवि । |
| द्विपदे | द्वौ दक्षिणवामपादौ यस्मिन् तत् द्विपद् ।<br>दक्षते वर्धते इति दक्षिणः । दक्ष वृद्धौ । तेन पद्यते इति दक्षिणपादः ।<br>वायते वम्यते च इति वामः । वा गतौ । वमु उद्गिरणे । तेन पद्यते इति वामपादः । |
| चतुष्पदे | पद्यते अनेन इति पादः । पद गतौ । (सोऽयमात्मा चतुष्पात् । जाग्रत् – स्वप्न – सुषुप्ति – तुरीयः इति) |
| विश्वं | विशते इति विश्वम् । विश प्रवेशने । |
| पुष्टं | पुष्यते स्म पुष्टम् । पुष पुष्टौ । |
| ग्रामे | ग्रस्यते अद्यते इति ग्रामम् । ग्रसु अदने । |
| अस्मिन् | (पुं, इदम्, स.वि., ए.व.) |
| अनातुरम् | न त्वरा अस्य अस्ति इति अनातुरम् । त्वरते इति तुरः । आ स्मृतौ तुरः आतुरः । न आतुरः अत्र अनातुरम् । ञि त्वरा सम्भ्रमे । |

तवसे कपर्दिने क्षयद्वीराय रुद्राय इमां मतिम् प्रभरामहे ।

- Who is very powerful (तवस्),
- Having matted-locks (कपर्दी),
- Having enemies destroyed (क्षयद्वीरः),
- To that Rudra (रुद्राय)
- We contemplate (प्रभरामहे) this (इमां) Buddhi (मतिम्).

यथा शम् असत् नः द्विपदे चतुष्पदे आस्मिन् ग्रामे विश्वं पुष्टं अनातुरम् ॥

- For the happiness (यथा शम् असत्) of our (नः)
- bipeds (द्विपद् = 2-legged) and quadrupeds (चतुष्पद् = 4-legged)
- For all beings (विश्वं) in this village (आस्मिन् ग्रामे) to be
- well-nourished (पुष्टं) and free from troubles (अनातुरम्).

Śiva is contemplated in these four forms: तवस्, कपर्दी, क्षयद्वीरः and रुद्रः, so that both of our 2-legged and 4-legged beings are happy forever. And also, the entire village shall be prosperous and free from all troubles. So, whoever recites Rudra-namakam, not only his family and cattle, but the entire village will be prosperous and free from troubles.

रुद्राध्यायी वसेद् यत्र ग्रामे वा नगरेऽपि वा ।
न तत्र क्षुत्पिपासाद्या दुर्भिक्षव्याधयोऽपि च ॥ (पुराणेषु, भट्टभास्करेण उदाहृतम्)

द्विपद् = 2-footed also indicates 2-paths of Vāma and Dakṣiṇa, bringing Saṁsāra and Sannyāsa respectively. चतुष्पद् = 4-footed, also indicates 4-states of consciousness: Jāgrat, Svapna, Suṣupti and Turīya. So, let there be eternal bliss in both Saṁsāra and Sannyāsa, while being in Jāgrat / Svapna / Suṣupti / Turīya states. ग्राम also indicates the set of our 11-Indriyās. So let all these Indriyās serve the Rudra with full dedication and without any distractions.

10.4 मृ॒डा नो॑ रुद्रो॒त नो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम ते ।
यच्छं च॒ योश्च॒ मनु॑राय॒जे पि॒ता तद॑श्याम॒ तव॑ रुद्र॒ प्रणी॑तौ ॥

मृडा नः रुद्र! उत नः मयः कृधि क्षयद्वीराय नमसा विधेम ते ।
यत् शं च योः च मनुः आयजे पिता तत् अश्याम तव रुद्र प्रणीतौ ॥ 10-4॥

| | |
|---|---|
| रुद्र !<br>नः मृडा | रुद्र!<br>नः = अस्मान् (अस्मद्, द्वि.वि., ब.व.) । मृडय = सुखय । |
| उत मयः कृधि | मयः = निरतिशयम् आनन्दात्मकं सुखम् । कृधि = कुरु । डुकृञ् करणे । |
| क्षयद्वीराय | क्षियन्ति निवसन्ति वीराः यं प्राप्य / आश्रित्य सः क्षयद्वीरः । क्षी निवासे । |
| ते नमसा विधेम | ते (युष्मद्, च.वि., ए.व.) । नमसा = नमस्कारेण । विधेम = परिचरेम । विध विधाने । |
| यत् शम् | यत् (न., यद्, प्र.वि., ए.व.) । शम् = सुखम् । शमु उपशमे । |
| योः | आगतानां दुःखहेतूनां अपृथग्भावः । यु मिश्रणे। |
| मनुः | मनुते इति मनुः । मनु अवबोधने । |
| आयजे | यज देवपूजासङ्गतिषु । |
| पिता | पाति इति पिता । पा रक्षणे । |
| अश्याम | प्राप्नुयाम । अश भोजने । |
| तव | (युष्मद्, ष.वि., ए.व.) |
| प्रणीतौ | प्रणये । णीञ् प्रापणे । |

- रुद्र ! = Rudra!
- मृडा नः = Make us Happy.
- उत नः मयः कृधि = Also, bestow the Eternal Bliss!

O Rudra, bless us with both worldly happiness and Eternal happiness of Kaivalya.

- क्षयद्वीराय = For vanquishing our enemies (Kāma, Krodha, Moha etc...),
- नमसा विधेम ते = We serve you, with devotion.

To be victorious on our internal and external enemies, we serve you with complete surrendering and devotion.

- रुद्र ! = Rudra!
- शं च = The Happiness and

- योः च = Freedom from Suffering,
- यत् = That which
- पिता मनुः आयजे = Our fore father Manu has acquired,
- तव प्रणीतौ = Through your affection.
- तत् अश्याम = We shall acquire it.

The eternal happiness, resulting through the freedom from 3-duḥkhās has been acquired by our foremost father Manu through your affection. We shall also acquire that Kaivalya state, free from duḥkhās.

As per yogasutras, पूर्वेषाम् अपि गुरुः कालेन-अनवच्छेदात् । He is the teacher of our ancestors also. So, Manu is the first being manifested from Brahma-deva. Manu has also attained the Kaivalya state through the Worship of Śiva. So, requesting him to bestow the same Sukha and duḥkha-nivṛtti to us also.

Kaivalya state is explained in two ways—

1) Ānanda, eternal bliss.
2) Duḥkha-traya nivṛtti., i.e., Mokṣa from Duḥkhās.

And this Kaivalya / Ānanda / Mokṣa is granted by Īśvara whomever he chooses to grant. As explained in Kaṭhopaniṣat—

> नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
> यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ 1.2.23

This Self cannot be attained by study of the Scriptures, nor by intellectual perception, nor by frequent hearing (of It); He whom the Self chooses, by him alone is It attained. To him the Self reveals Its true nature.

10.5 मा नों म॒हान्तं॑मु॒त मा नों अर्भ॒कं मा न॒ उक्षं॑न्त-मु॒त मा नं॑ उक्षि॒तम् ।
मा नोंऽवधीः पि॒तरं॒ मोत मा॒तरं॑ प्रि॒या मा नं॑स्त॒नुवों रुद्र रीरिषः ॥

मा नः महान्तम् उत मा नः अर्भकं

मा नः उक्षन्तम् उत मा नः उक्षितम् ।

मा नः वधीः पितरं मा+उत मातरं

प्रियाः मा नः तनुवः रुद्र! रीरिषः ॥ 10-5॥

| | |
|---|---|
| नः | अस्माकम् । (अस्मद्, ष.वि., ब.व.) |
| महान्तम् | मह्यते इति महत् । मह पूजायाम् । |
| अर्भकं | अन्यम् अवलम्ब्य ऋच्छति, गच्छति इति अर्भकः । ऋ गतौ । |
| उक्षन्तम् | उक्षति, विषयदृष्ट्या सिञ्चति इति उक्षा । उक्ष सेचने । |
| उक्षितम् | उक्षियति विषयः अन्तरिन्द्रिये इति उक्षितः । क्षि निवासे । |
| मा वधीः | मा हिंसीः । हन हिंसायाम् । |
| पितरं | पाति इति पिता । पा रक्षणे । |
| मातरं | माति, तोलयति स्वरूपज्ञानम् अत्र माता । मा माने । |
| प्रियाः | प्रीणाति इति प्रियः । प्रीङ् प्रीणने । |
| तनुवः | तन्यते, आध्यात्मिकं विस्तीर्यते इति तनुः । तनु विस्तारे । |
| मा रीरिषः | मा हिंसीः । रिष हिंसायाम् । |

- रुद्र ! = Rudra!
- मा नः महान्तम् = Not our elders,
- उत मा नः अर्भकं = Not our children,
- मा नः उक्षन्तम् = Not our Adults,
- उत मा नः उक्षितम् = Not our fetuses,
- मा नः पितरं = Not our mother,
- मा+उत मातरं = Not the mother,
- मा नः प्रियाः तनुवः = Not our dear bodies,
- वधीः = be slayed.
- रीरिषः = be troubled.

O Rudra, do not destroy / trouble Our elders, our children, our adults, our fetuses, our father and the mother, and not even our dear bodies. Praying to Rudra, to protect the lineage. Parents, grand-parents and further elder people in the upward direction; And fetuses, children, and adult grown ones who can continue this lineage further down - Let all these be protected, without getting troubles and death. Also, these dearest bodies be protected, because शरीरमाद्यं खलु धर्मसाधनम् - We can accomplish any dharma only through these bodies.

*Figure 11. Illustration of family-tree in the context of Rudra-mantra 10.5*



10.6 मान॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः ।
वी॒रान्मा नो॑ रुद्र भामि॒तोऽव॑धी-र्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते ॥

मा नः तोके तनये मा नः आयुषि मा नः गोषु मा नः अश्वेषु रीरिषः ।
वीरान् मा नः रुद्र! भामितः वधीः हविष्मन्तः नमसा विधेम ते ॥ 10-6॥

| | |
|---|---|
| नः | अस्माकम् । (अस्मद्, ष.वि., ब.व.) |
| तोके | तोति आध्यात्मिकम् अनेन तोकम् । तु वृद्धौ । |
| तनये | तनोति आध्यात्मिकम् इति तनयः । तनु विस्तारे । |

| | |
|---|---|
| आयुषि | आध्यात्मिकम् एति इति आयुः । इण् गतौ । |
| गोषु | गच्छति आध्यात्मिके सुचिरम् इति, गम्यम् इति च, स्वस्थानम् इति च गौः, तासु । गमॢ गतौ । |
| अश्वेषु | साधनगमनेन अश्नुते आध्यात्मिकम् इति अश्वः । अशू व्याप्तौ । |
| मा रीरिषः | मा हिंसीः । रिष हिंसायाम् । |
| वीरान् | वीरयति इति वीरः । वीर विक्रान्तौ । |
| भामितः | भाम क्रोधे + क्त । |
| मा वधीः | मा हिंसीः । हन हिंसायाम् । |
| हविष्मन्तः | हूयते विषयात्मक जीवनम् इति हविः । हू दानादानयोः । तत् अस्मासु अस्ति इति हविष्मन्तः । |
| ते नमसा विधेम | ते (युष्मद्, च.वि., ए.व.) । नमसा = नमस्कारेण । विधेम = परिचरेम । विध विधाने । |

- रुद्र ! = O Rudra,
- भामितः = Being angered,
- मा नः तोके तनये = Do not (trouble) our kids and sons,
- मा नः आयुषि = Do not (trouble) our longevity,
- मा नः गोषु = Do not (trouble) our cows,
- मा नः अश्वेषु रीरिषः = Do not trouble our horses,
- मा नः वीरान् वधीः = Do not kill our Brave/Powerful.
- हविष्मन्तः = By offering oblations,
- नमसा विधेम ते = We serve you with devotion.

O Rudra, being angered at our mistakes, do not trouble our kids, and sons protecting our lineage. Do not reduce our life-span, do not trouble our cattle like cows and horses, etc. Do not also kill our warriors. We serve you with devotion by holding these oblations. Cows (gau) indicate the Vedas/Knowledge. Horse (Ashwa) indicate the Indriyās perceiving this Knowledge. Bravery (Veera) indicate the strength required in this sādhana. Kleśās are the result of Avidyā. So, this and the previous ślokās are prayers to Rudra to remove our Kleśās like Avidyā, Asmitā, Rāga, etc. When Kleśās are removed, the Self is illuminated in Pure Sattva-guṇa. So, one becomes immortal.

10.7 आ॒रात्ते॑ गो॒घ्न उ॒त पू॑रुष॒घ्ने क्ष॒यद्वी॑राय सु॒म्नम॒स्मे ते॑ अस्तु ।
